१२९

पंचमिलाण

॥१॥ ॥श्रीगणेशायनमः॥ ॥अथातोदैवतंतद्यानिनामानिप्राधान्यस्तुती
नांदेवतानांतद्दैवतमित्याचक्षतेसैषादेवतोपपरीक्षायत्कामऋषि
र्यस्यांदेवतायामार्थपत्यमिच्छंस्तुतिंप्रयुङ्क्ते तद्दैवतःसमंत्रोभवतिता
स्त्रिविधाऋचःपरोक्षकृताःप्रत्यक्षकृताआध्यात्मिक्यश्चतत्रपरोक्ष
कृताःसर्वाभिर्नामविभक्तिभिर्युज्यंतेप्रथमपुरुषैश्चाख्यातस्य॥१॥

॥१॥

इंद्रोदिवइंद्रईशेपृथिव्याइंद्रमिद्गाथिनोबृहदिंद्रेणैतेतृत्सवोवेवि
षाणाइंद्रायसामगायतनेंद्रादृतेपवतेधामकिंचनेंद्रस्यनुवीर्याणि
प्रवोचमिंद्रेकामाअयंसतेत्यथप्रत्यक्षकृतामध्यमपुरुषयोगास्त्व
मितिचैतेनसर्वनाम्ना॥त्वमिंद्रबलादधि॥विनइंद्रमृधोजहीत्य
थापिप्रत्यक्षकृतास्तोतारोभवंतिपरोक्षकृतानिस्तोतव्यानि॥माचि

द्न्यद्धिशंसत कण्वा अभिप्रगायतोपप्रेतकुशिकाश्चेतयध्वमित्यथा
ध्यात्मिक्य उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना ॥ २ ॥ यथैत
दिंद्रो वैकुंठो लवसूक्तं वागांभृणीयमिति परोक्षकृताः प्रत्यक्षकृता
श्च मंत्रा भूयिष्ठा अल्पश आध्यात्मिका अथापि स्तुतिरेव भवति नाशी
र्वाद इंद्रस्य नु वीर्याणि प्रवोचमिति यथैतस्मिन्सूक्ते अथाप्याशीरेव न।

स्तुतिः सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूया
समिति तदेतद्बहुलमाध्वर्यवे याज्ञेषु च मंत्रेष्वथापि शपथाभिशापौ।
अद्यामुरीय यदि यातुधानो अस्मि ॥ अधा स वीरैर्दशभिर्वियूया इत्य
थापि कस्यचिद्भावस्याचिख्यासा ॥ न मृत्युरासीदमृतं न तर्हि। तम आ
सीत्तमसा गूल्हमग्रे ॥ अथापि परिदेवना कस्माच्चिद्भावात्। सुदेवो अद्य

॥३

ष्पतेद्नावृत्त्। नविजानामियदिवेदमस्मीत्यापिनिंदाप्रशंसे ॥ केव
लाघोभवतिकेवलादी। भोजस्येदंपुष्करिणीववेश्मेत्येवमक्षसूक्तेद्यू
तनिंदाचकृषिप्रशंसाचैवमुच्चावचैरभिप्रायैॠषीणांमंत्रदृष्टयोभवंति
॥३॥ तद्येनादिष्टदेवतामंत्रास्तेषुदेवतोपपरीक्षायद्देवतःसयज्ञोवा
यज्ञांगंवातद्देवैभवंसथान्यत्रयज्ञात्प्राजापत्याइतियाज्ञिकानाराशं
ता

॥३॥

साइतिनैरुक्ताअपिवासाकामदेवतास्यात्प्रायोदेवतावास्तिह्याचारोबहु
लंलोकेदेवदेवत्यमतिथिदेवत्यंपितृदेवत्यंयाज्ञदैवतोमंत्रइत्यपिह्य
देवतादेवतावत्स्तूयंतेयथाश्वप्रभृतीन्योषधिपर्यंतानि ॥४॥ अथाप्यष्टौ
द्वंद्वानिसनमन्येतागंतूनिवार्थांदेवतानांप्रत्यक्षदृश्यमेतद्भवतिमा
हाभाग्याद्देवतायाएकआत्माबहुधास्तूयतएकस्यात्मनोन्येदेवाःप्र

प३

त्यंगानिभवंत्यपिचसत्वानांप्रकृतिभूमभिर्ऋषयस्तुवंतीत्याहुः प्रकृतिः
सार्वनाम्याच्चेतरेतरजन्मानोभवंतीतरेतरप्रकृतयः कर्मजन्मानआ
त्मजन्मानआत्मैवैषांरथोभवत्यात्माश्वआत्मायुधमात्मेषवआत्मा
सर्वंदेवस्यदेवस्य॥५॥ ॥प्रथमःपादः॥१॥ ॥तिस्रएवदेवताइति
नैरुक्ताअग्निःपृथिवीस्थानोवायुर्वेंद्रोवांतरिक्षस्थानःसूर्योद्युस्था

नस्तासांमहाभाग्यादेकैकस्याअपिबहूनिनामधेयानिभवंत्यपिवाकर्मपृ
थक्त्वाद्यथाहोताध्वर्युर्ब्रह्मोद्गातेत्यप्येकस्यसतोपिवापृथगेवस्युःपृथ
ग्घिस्तुतयोभवंतितथाभिधानानियथोएतत्कर्मपृथक्त्वादितिबहवो
पिविभज्यकर्माणिकुर्युस्तत्रसंस्थानैकत्वंसंभोगैकत्वंचोपेक्षितव्यं
यथापृथिव्यांमनुष्याःपशवोदेवाइतिस्थानैकत्वंचसंभोगैकत्वंचदृ

श्यतेयथापृथिव्याःपर्ज्जन्येनचवाय्वादित्याभ्यांचसंभोगोग्निनाचेतर
स्यलोकस्यतत्रैतन्नरराष्ट्रमिव॥६॥अथाकारचिंतनंदेवतानांपुरु
षविधास्युरित्येकंचेतनावद्वद्धिस्तुतयोभवंतितथाभिधानान्यथापिपौ
रुषविधिकैरंगैःसंस्तूयंते॥ऋष्वातइंद्रस्थविरस्यबाहूयत्संगृभ्णा
मघवन्काशिरित्ते॥अथापिपौरुषविधिकैर्द्रव्यसंयोगैः॥आद्वाभ्यां

हरिभ्यामिंद्रयाहि॥कल्याणीर्जायासुरणंगृहेते॥अथापिपौरुषविधि
कैःकर्मभिः॥अद्धींद्रपिबचप्रस्थितस्य॥आश्रुत्कर्णश्रुधीहवं ७
अपुरुषविधास्युरित्यपरमपितुयद्दृश्यतेपुरुषविधंतद्यथाग्निर्वायु
रादित्यःपृथिवीचंद्रमाइतियथोएतच्चेतनावद्वद्धिस्तुतयोभवंतीत्य
चेतनान्यप्येवंस्तूयंतेयथाक्षप्रभृतीन्योषधिपर्यंतानियथोएतत्पौरु

६

षविधिकैरंगैः संस्तूयंत इत्यचेतनेष्वप्येतद्भवत्यभिक्रंदंतिहरितेभिरा
सभिरितिग्रावस्तुतिर्यथोएतत्पौरुषविधिकैर्द्रव्यसंयोगैरित्येतदपि
तादृशमेवसुखंरथंयुयुजेसिंधुरश्विनमितिनदीस्तुतिर्यथोएतत्पौरु
षविधिकैः कर्मभिरित्येतदपितादृशमेवहोतुश्चित्पूर्वेहविरद्यमाश श्री
तेतिग्रावस्तुतिरेवापिवोभयविधास्युरपिवापुरुषविधानामेवसतांक

६

न
र्मात्मामएतेस्युर्यथायज्ञोयजमानस्यैषचाख्यानसमयः॥८॥इतिद्वि
तीयःपादः॥ ॥तिस्रएवदेवताइत्युक्तंपुरस्तात्तासांभक्तिसाहचर्यं
व्याख्यास्यामोथैतान्यग्निभक्तीन्ययंलोकःप्रातःसवनंवसंतोगायत्री
त्रिवृत्स्तोमोरथंतरंसामयेचदेवगणाःसमाम्नाताःप्रथमेस्थानेग्ना
यीपृथिवीलेतिस्त्रियोथास्यकर्मवहनंचहविषामावाहनंचदेवतानां

यच्चदार्ष्टिविषयिकमग्निकमेवतद्थास्यसंस्तविकादेवाइंद्रःसोमो
वरुणःपर्जन्यऋतवआग्नावैष्णवंचहविर्नत्वृक्संस्तविकीदशत
यीषुविद्यतेथाप्याग्नापौष्णंहविर्नतुसंस्तवस्तत्रैतांविभक्तस्तुतिमृच
मुदाहरंति॥९॥पूषात्वेतश्च्यावयतुप्रविद्वाननष्टपशुर्भुवनस्यगोपाः
॥सत्वैतेभ्यःपरिददत्पितृभ्योग्निर्देवेभ्यःसुविदत्रियेभ्यः॥पूषात्वे

तःप्रच्यावयतुविद्वाननष्टपशुर्भुवनस्यगोपाइत्येषहिसर्वेषांभूतानां
गोपायितासत्वैतेभ्यःपरिददत्पितृभ्यइतिसांशयिकस्तृतीयःपादः
पूषापुरस्तात्तस्यान्वादेशइत्येकमग्निरुपरिष्टात्तस्यप्रकीर्त्तनेत्यप
रं॥अग्निर्देवेभ्यःसुविदत्रियेभ्यः॥सुविदत्रंधनंभवतिविंदतेर्वैको
पसर्गाद्दधातेर्वास्याद्व्युपसर्गात्॥१०॥अथैतानींद्रभक्तीन्यंतरिक्षलो

दा१

८ कोमाध्यंदिनंसवनंग्रीष्मस्त्रिष्टुप्पंचदशस्तोमोबृहत्सामयेचदेवगणाःस
माम्नातामध्यमेस्थानेयाश्चस्त्रियोथास्यकर्मरसानुप्रदानंवृत्रवधोया
चकाचिद्बलकृतिरिंद्रकर्मैवतदथास्यसंस्तविकादेवाअग्निःसोमोव
रुणःपूषाबृहस्पतिर्ब्रह्मणस्पतिःपर्वतःकुत्सोविष्णुर्वायुरथापिमित्रो
वरुणेनसंस्तूयतेपूष्णारुद्रेणचसोमोवायुनाचपूषावातेनपर्जन्यः॥३॥ ८
व

त्य
अथैतान्यादिभक्तीन्यसौलोकस्तृतीयसवनंवर्षाजगतीसप्तदशस्तो
मोवैरूपंसामयेचदेवगणाःसमाम्नाताउत्तमेस्थानेयाश्चस्त्रियोथास्यक
र्मरसादानंरश्मिभिश्चरसधारणंयत्तुकिंचित्प्रवह्लितमादित्यकर्मैवत
चंद्रमसावायुनासंवत्सरेणेतिसंस्तवः॥४॥एतेष्वेवस्थानव्यूहेष्वृतुछं
दस्तोमपृष्ठस्यभक्तिशेषमनुकल्पयीतशरदनुष्टुबेकविंशस्तोमोवैरा

जंसामेतिपृथिव्यायतनानिहेमंतःपंक्तिस्त्रिणवस्तोमःशाक्वरंसामेत्यं
तरिक्षायतनानिशिशिरोतिछंदांस्त्रयस्त्रिंशस्तोमोरैवतंसामेतिद्युभ
क्तीनि॥५॥मंत्रामननाच्छंदांसिछादनाद्यजुर्यजतेःसामसंमितमृचा
स्यतेर्वर्चासमंमेनइतिनैदानागायत्रीगायतेस्तुतिकर्मणस्त्रिगमनावा
विपरीतागायतोमुखादुदपतदितिचब्राह्मणम्॥६॥उष्णिगुत्स्नाता

भवतिस्निह्यतेर्वास्यात्कांतिकर्मणउष्णीषिणीवेत्यौपमिकमुष्णीषंस्ना
यतेःककुप्ककुभिनीभवतिककुब्चकुब्जश्चकुजतेर्वाउब्जतेर्वानुष्टुबनु
ष्टोभनाद्गायत्रीमेवत्रिपदांसतींचतुर्थेनपादेनानुष्टोभतीतिचब्रा
ह्मणम्॥७॥बृहतीपरिबर्हणात्पंक्तिःपंचपदात्रिष्टुप्स्तोभत्युत्तरपदा
कातुत्रितास्यात्तीर्णतमंछंदस्त्रिवृद्वज्रस्तस्यस्तोभतीतिवायत्त्रिरस्तो

उ

१० भत्तत्रिष्टुभस्त्रिष्टुप्त्वमितिविज्ञायते॥८॥जगतीगततमंछंदोजलचर
गतिर्वाजल्गल्यमानोसृजदितिचब्राह्मणंविराड्विराजनाद्वाविराधना
द्वाविप्रापणाद्वाविराजनात्संपूर्णाक्षराविराधनादूनाक्षराविप्रापणा
दधिकाक्षरापिपीलिकमध्येत्यौपमिकंपिपीलिकापेलतेर्गतिकर्मणः
॥९॥इतीमादेवताअनुक्रांताःसूक्तभाजोहविर्भाजऋग्भाजश्चभूयि १०

ष्ठाःकाश्चिन्निपातभाजोथोताभिधानैःसंयुज्यहविश्चोदयतींद्रायवृत्रघ्न
इंद्रायांहोमुचइतितान्यप्येकेसमामनंतिभूयांसितुसमाम्नानाद्यत्तुसं
विज्ञानभूतंस्यात्प्राधान्यस्तुतितत्समामनेथोतकर्मभिरृषिर्देवतास्तौ
तिवृत्रहापुरंदरइतितान्यप्येकेसमामनंतिभूयांसितुसमाम्नानाद्व्यंज
नमात्रंतुतत्तस्याभिधानस्यभवतियथाब्राह्मणायबुभुक्षितायौदनं दे

११ हिस्नातायानुलेपनंपिपासतेपानीयमिति ॥ १० ॥ इतितृतीयःपादः ॥ ३
अथातोनुक्रमिष्यामोग्निःपृथिवीस्थानस्तंप्रथमंव्याख्यास्यामो॰
ग्निःकस्मादग्रणीर्भवत्यग्रंयज्ञेषुप्रणीयतेंगंनयतिसंनममानोक्नो
पनोभवतीतिस्थौलाष्ठीविर्नक्नोपयतिनस्नेहयति त्रिभ्यआख्या
तेभ्योजायतइतिशाकपूणिरितादक्तादग्धाद्वानीतात्सखल्वेते ११

रिपा८

रकारमादत्तेगकारमनक्तेर्वादहतेर्वानीःपरस्तस्यैषाभवति ॥ १ ॥ अ
ग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं ॥ अग्निमी
ळेग्निंयाचामीळिरध्येषणाकर्मापूजाकर्मावापुरोहितोव्याख्यातोय
स ज्ञश्चदेवोदानाद्वादीपनाद्वाद्योतंद्वाद्युस्थानोभवतीतिवायोदेवःसा
देवताहोतारंह्वातारंजुहोतेर्होतेरित्यौर्णवाभोरत्नधातमंरमणीया॰

ना

नोधनानांदातृतमंतस्यैषापराभवति॥२॥अग्निःपूर्वेभिर्ऋषिभिरीड्यो
नूतनेरुत॥सदेवाँएहवक्षति॥अग्निर्यःपूर्वैर्ऋषिभिरीलितव्योस्मा
भिश्चनवतरैःसदेवानिहावहत्वितिसनमन्येतायमेवाग्निरित्यप्ये
तेउत्तरेज्योतिषीअग्नीउच्येतेततोनुमध्यमः॥३॥अभिप्रवंतसम
नेवयोषाःकल्याण्यःस्मयमानासोअग्निं॥घृतस्यधाराःसमिधो

वंपाठ
नसंतताजुषाणोहर्यतिजातवेदाः॥अभिनमंतसमनसइवयोषाः
समनंसमननाद्वासंमाननाद्वाकल्याण्यःस्मयमानासोअग्निमित्यौ
पमिकंघृतस्यधाराउदकस्यधाराःसमिधोनसंतनसतिराप्नोतिकर्मा
वानमतिकर्मावा॥ताजुषाणोहर्यतिजातवेदाः॥हर्यतिःप्रेप्साकर्मा
भिहर्यतीतिसमुद्रादूर्मिर्मधुमाँउदारदित्यादित्यमुक्तंमन्यंतेसमु

द्राध्येयोद्ध्य। उद्दैतीतिचब्राह्मणमथापिब्राह्मणंभवत्यग्निःसर्वादे
वताइतितस्योत्तराभूयसेनिर्वचनाय॥४॥ इंद्रंमित्रंवरुणमग्निमा
हुरथोदिव्यःससुपर्णोगरुत्मान्॥ एकंसद्विप्राबहुधावदंत्यग्निं
यमंमातरिश्वानमाहुः॥ इममेवाग्निंमहांतमात्मानमेकमात्मा
नंबहुधामेधाविनोवदंतींद्रंमित्रंवरुणमग्निंदिव्यंचगरुत्मंतं

दिव्योदिविजोगरुत्मान्गरणवान्गुर्वात्मामहात्मेतिवायस्तुसू
क्तंभजतेयस्मैहविर्निरुप्यतेयमेवसोग्निर्निपातमेवैतेउत्तरेज्यो
तिषीएतेननामधेयेनभजेते॥५॥ इतिचतुर्थःपादः॥ ॥जातवेदाः
कस्माज्जातानिवेदजातानिवैनंविदुर्जातेजातेविद्यतइतिवाजा
तवित्तोवाजातधनोवाजातविद्योवाजातप्रज्ञानोयत्तज्जातःपश्वन।

१४ विंदतत्ज्जातवेदसोजातवेदस्त्वमितिब्राह्मणंतस्मात्सर्वानृतून्प
शवोग्निमभिसर्पंतीतिचतस्यैषाभवति।।जातवेदसेसुनवामसो
ममरातीयतोनिदहातिवेदः।सनःपर्षदतिदुर्गाणिविश्वानाव
वसिंधुंदुरितात्यग्निः।।जातवेदसइतिजातवेदस्यांविवंजातवेदसे
र्थायसुनवामसोममितिप्रसवायाभिषवायसोमंराजानममृत १४

मरातीयतोयज्ञार्थमिनिस्मोनिदहातिनिश्चयेनदहतिभस्मी
करोतिसोमादददित्यर्थः।सनंपर्षदतिदुर्गाणिविश्वानिदुर्गा
मा।निस्थानानिनावेवसिंधुंनावासिंधुंसिंधुंनावानदींजलदु
र्गीमहाकूलांतारयतिदुरितात्यग्निरितिदुरितानितारयतित
स्यैषापराभवति।।२।।प्रनूनंजातवेदसमश्वंहिनोतवाजिनं।।

१५ इदंन्नोबर्हिरासदे॥ प्रेहिजातवेदसंकर्मभिःसमश्नुवानम
पिवोयमार्थेस्यादश्वमिवजातवेदसमितीदन्नोबर्हिरासीद
त्वितितदेतदेकमिवजातवेदसंगायत्रंत्रचंदृशतयीषुविद्यते ८३
यत्तुकिंचिदाग्नेयंतज्जातवेदसानांस्थानेयुज्यतेसममन्येता
यमेवाग्निरित्यप्येतेउत्तरेज्योतिषीजातवेदसाउच्येतेततोनु १५

मध्यमः॥ अभिप्रवंतसमनेवयोषाइतितत्पुरस्ताद्व्याख्यातमथा
सावादित्यउदुत्यंजातवेदसमितितदुपरिष्टाद्व्याख्यास्यामोयस्तु
स्तत्कंभजतेयस्मैहविर्निरुप्यतेयमेवसोग्निर्जातवेदानिपातमे
वैतेउत्तरेज्योतिषीएतेननामधेयेनभजेते॥ ३॥ ॥इतिपंचमः
पादः॥ ॥वैश्वानरःकस्माद्विश्वांनरांनयतिविश्वएनंनरानयं

तीतिवापिवाविश्वानरएवस्यात्प्रत्यृतःसर्वाणिभूतानितस्यवैश्वा
नरस्तस्यैषाभवति॥१॥ वैश्वानरस्यसुमतौस्यामराजाहिकंभुवना
नामभिश्रीः॥ इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्ये
ण॥ इतोजातःसर्वमिदमभिविपश्यतिवैश्वानरःसंयततेसूर्ये
णराजायःसर्वेषांभूतानामभिश्रयणीयस्तस्यवयंवैश्वानरस्य

कल्याण्यांमतौस्यामेतितत्कोवैश्वानरोमध्यमइत्याचार्यावर्षकर्म
णाह्येनंस्तौति॥२॥ प्रनूमहित्वंवृषभस्यवोचंयंपूरवोवृत्रहणंसचं
ते॥ वैश्वानरोदस्युमग्निर्जघन्वाँअध्रूनोत्काष्ठाअवशंबरंभेत॥
प्रब्रवीमितन्महित्वंमहाभाग्यंवृषभस्यवर्षितुरपांयंपूरवःपूर-
यितव्यामनुष्यावृत्रहणंमेघहनंसचंतेसेवंतेवर्षकामादस्युर्दस्य

१७ तेः स्यार्थाद्रुपदस्येत्यस्मिन्नसानुपदासयतिकर्माणितमग्निर्वैश्वा
नरोघ्नंनवाधूनोदपःकाष्ठाअअभिनछंबरंमेघमथासावादित्य
इतिपूर्वेयाज्ञिकाः॥३॥एषांलोकानांरोसवनानांरोहआम्नातो हे
रोहात्प्रत्यवरोहाश्चिकीर्षितस्तामनुकृतिंहोताग्निमारुतेशस्त्रेवैश्वा
नरीयेणसूक्तेनप्रतिपद्यतेसोपिनस्तोत्रियमाद्रियेताग्नेयोहिभव १७

तिततआगछतिमध्यस्थानादेवतारुद्रंचमरुतश्चततोग्निमिहस्थानमत्रै
वस्तोत्रियंशंसति॥४॥अथापिवैश्वानरीयोद्वादशकपालोभवत्येतस्य
हिद्वादशविधंकर्माथापिब्राह्मणंभवत्यसौवाआदित्योग्निर्वैश्वानर
इत्यथापिनिवित्सौर्यवैश्वानरीभवत्यायोद्यांभात्यापृथिवीमित्येष
हिद्यावापृथिव्यावाभासयत्यथापिछांदोमिकंसूक्तंसौर्यवैश्वानरंभव

तिदिविपृष्ठोऽरोचतेत्येषहिदिविपृष्ठोऽरोचतेसयथापिहविष्यांतायंस्तु
त्तःसौर्यंवैश्वानरंभवति॥५॥ अयमेवाग्निर्वैश्वानरइतिशाकपूणिर्विश्वा
नरावेतेउत्तरेज्योतिषीवैश्वानरोयंयत्ताभ्यांजायतेकथंन्वयमेताभ्यां
जायतइतियत्रवैद्युतःशरणमभिहंतियावदनुपात्तोभवतिमध्यमध
र्म्मैवतावद्भवत्युदकेंधनुःशरीरोपशमनउपादीयमानएवायंसंपद्यतउदको

पशमनःशरीरदीप्तिः॥६॥ अथादित्यादुदीचिप्रथमसमावृत्तआ
दित्येकंसंवामणिंवापरिमृज्यप्रतिस्वरेयत्रशुष्कगोमयमसंस्पर्श
यंधारयतितत्प्रदीप्यतेसोयमेवसंपद्य॒तेतथाप्या॒ह॥ वै॒श्वा॒न॒रोय
तते॒सूर्ये॒णेति॥ नचपुनरात्मानात्मासंयततेन्येनैवान्यःसंयततइ
तइममादधात्यमुतोमुष्यरश्मयःप्रादुर्भवंतीतोस्यार्चिषस्तयो।

१९ मीसोःसंसंगाद्दृष्ट्वैवमवक्ष्यत् ॥७॥ अथयान्येतान्यौत्तमकानिसूक्ता
निभागानिवासावित्राणिवासौम्यानिवावैष्णवानिवातेषुवैश्वान
रीयाःप्रवादा अभविष्यन्नादित्यकर्मणाचैनमस्तोष्यन्नित्युदेषी
२ति त्यस्तमेषींविपर्येषीत्याग्नेयेष्वेवहिसूक्तेषुवैश्वानरीयाःप्रवादा
भवंत्यग्निकर्मणाचैनंस्तौतीतिदहसीतिवहसीतिपचसीतियथो १९

प्ये
एतद्वर्षकर्मणाह्येनंस्तौतीत्यस्मिन्नुपेतदुपपद्यते ॥८॥ समानमेत
दुदकमुच्चैत्यवचाहभिः॥ भूमिंपर्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयः
॥इतिसानिगदव्याख्याता॥९॥ ॥इतिषष्ठःपादः॥ ॥कृष्णंनि
यानंहरयःसुपर्णाअपोवसानादिवमुत्पतंति। तआववृत्रन्सदना
दृतस्यादिद्घृतेनपृथिवीव्युद्यते॥ कृष्णंनिरयणंरात्रिरादित्यस्य

हरयःसुपर्णाहरणाआदित्यरश्मयस्तेयदामुतोर्वाचःपर्यावर्त्तंतेसह
स्थानाउदकस्यादित्यादथघृतेनोदकेनपृथिवीव्युद्यतेघृतमित्युद
कनामजिघर्त्तेःसिंचतिकर्मणोथापिब्राह्मणंभवत्यग्निर्वाइतोवृष्टिंस
मीरयतिधामछदिविभूत्वावर्षतिमरुतःसृष्टांवृष्टिंनयंतियदासावादित्यो
ग्निंरश्मिभिःपर्यावर्त्ततेथवर्षतीतियथोएतद्रोहात्प्रत्यवरोहश्चिकीर्षितइ

त्याम्नायवचनादेतद्भवतियथोएतत्॥१॥वैश्वानरीयोद्वादशकपालोभ
वतीत्सर्वंचकपालानिभवंत्यस्तिहिसोयिएककपालःपंचकपालश्चयथोएत
ब्राह्मणंभवतीतिबकुभक्तिवादीनिहिब्राह्मणानिभवंतिपृथिवीवैश्वानरः
संवत्सरोवैश्वानरोब्राह्मणोवैश्वानरइतियथोएत[illegible]त्तिवित्सोयिवैश्वानरीभ
वतीत्यस्यैवसाभवतीयोविड्भ्योमानुषीभ्योदीदेदित्येषहिविड्भ्योमानुषी

भ्योदीदप्रतियथोएतछांदोमिकंसूक्तंसौर्यवैश्वानरंभवतीत्यस्यैवतद्भ
वति जमदग्निभिराहुत इतिजमदग्नयःप्रजमिताग्नयोवाप्रज्वलि
ताग्नयोवातैराहुतोभवतियथोएतद्धविष्पांतीयंसूक्तंसौर्यवैश्वानरं
भवतीत्यस्यैवतद्भवति॥२॥हविष्पांतमजरंस्वर्विदिदिविस्पृश्या
हुतंजुष्टमग्नौ॥तस्यभर्मणेभुवनायदेवाधर्मणेकंस्वधयाप्रपथंत

॥हविर्यत्पानीयमजरंसूर्यविदिदिविस्पृश्याहुतंजुष्टमग्नौतस्यभरणाय
चभावनायचधारणायचैतेभ्यःसर्वेभ्यःकर्मभ्यइममग्निमन्नेनाप
प्रथंतेस्वधाप्याह॥३॥अपामुपस्थेमहिषाअगृभ्णतविशोराजानमु
पतस्थुऋग्मियं॥आदूतोअग्निमभरद्विवस्वतोवैश्वानरंमातरिश्वा
परावतः॥अपामुपस्थउपस्थानेमहत्यंतरिक्षलोकआसीनामहांत

इतिवागह्लतमाध्यमिकादेवगणाविशइश्वराजानमुपतस्थुरग्निमिय
मृग्मंतमितिवार्चनीयमितिवाहरयंदूतोदेवानांविवस्वतआदित्या
द्विवस्वान्विवासनवान्प्रेरितवतःपरागताद्वास्याग्नेर्वैश्वानरस्यमात
रिश्वानमाहर्त्तारमाहमातरिश्वावायुर्मातर्यंतरिक्षेश्वसितिमातर्या
श्वनितीतिवाथैनमेताभ्यांसर्वाणिस्थानान्यभ्योपादत्तेति॥४॥मूर्द्धा

भुवोभवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यन्॥मायामूतुयज्ञि
यानामेतामपोयत्तूर्णिश्चरतिप्रजानन्॥मूर्द्धामूर्त्तमस्मिन्धीयतेमूर्द्धा
यःसर्वेषांभूतानांभवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यन्सए
वप्रज्ञांत्वेतांमन्यंतेयज्ञियानांदेवानांयज्ञसंपादिनामपोयत्कर्मचरति
प्रज्ञानंसर्वाणिस्थानान्यनुसंचरतेत्वरमाणस्तस्योत्तराभूयसेनिर्वच

२३ नाय॥५॥स्तोमेनहिदिविदेवासोऽग्निमजीजनंछक्तिभीरोदसिप्रां॥त
मूऽअकृण्वंत्रेधाभुवेकंसओषधीःपचतिविश्वरूपाः॥स्तोमेनहियंदि
विदेवाऽअग्निमजनयन्कर्मभिर्द्यावापृथिव्योःपूरणंतमकुर्वंस्त्रेधाभा
वायपृथिव्यामंतरिक्षेदिवीतिशाकपूणिर्यदस्यदिवितृतीयंतदसावा
दित्यइतिब्राह्मणंतदग्नीकृत्यस्तौत्यथैनमेतयादित्यीकृत्यस्तौति॥६॥ २३

यदेदेनमदधुर्यज्ञियासोदिविदेवाःसूर्यमादितेयं॥यदाचरिष्णूमिथुना
वभूतामादित्प्रापश्यन्भुवनानिविश्वा॥यदैनमदधुर्यज्ञियाःसर्वेदिवि
देवाःसूर्यमदितेःपुत्रंयदाचरिष्णूमिथुनौप्रादुरभूतांसर्वदासहचारि
णावुषाश्चादित्यश्चमिथुनौकस्मान्मिनोतिःश्रयतिकर्माथुइतिनामकर
णस्थकारोवानयतिःपरोवनिर्वासमाश्रितावन्योन्यंनयतोवनुतोवाम

ष्ये

२४ नुष्यमिथुनावैतस्मादेवमेषंतावन्योन्यंवनुत इतिवाध्येनमेतयाग्नीक्र
स्स्तौति ।। ७ ।। यत्रावदेतेअवरःपरश्चयज्ञन्योःकतरोनौविवेद ।। आ
शेकुरि[illegible]सधमादंसखायोनक्षंतयज्ञंकइदंविवोचत ।। यत्रविवदेते
दैवौहोतारावयंचाग्निरसौचमध्यमःकतरोनौयज्ञेभूयोवेदेस्याश।
कुर्वंतितत्सहमदनंसमानख्याना ।। ऋत्विजस्तेषांयज्ञंसमाप्नुवानां २४
ना

कोनइदंविवक्ष्यतीतितस्योत्तराभूयसेनिर्वचनाय ।। ८ ।। यावन्मात्रमु
षसोनप्रतीकंसुपर्ण्योवसतेमातरिश्वः ।। तावद्दधात्युपयज्ञमायन्
ब्राह्मणोहोतुरवरोनिषीदन् ।। यावन्मात्रमुषसःप्रत्यक्तंभवतिप्रति
दर्शनमितिवास्त्युपमानस्यसंप्रत्यर्थेप्रयोग इहेवनिधेहीतियथा
सुपर्ण्यःसुपतनाएतारात्रयोवसतेमातरिश्वंज्योतिर्वर्णस्यतावदुप

दधातियज्ञमागछन्ब्राह्मणोहोतास्याग्नेर्होतुरवरोनिषीदन्होतृज
पस्त्वमग्निर्वैश्वानरीयोभवतिदिवसवितरेतंत्वावृणतेग्निंहोत्रायस
हपित्रावैश्वानरेणेतीममेवाग्निंसवितारमाहसर्वस्यप्रसवितारंम
ध्यमंवोत्तमंवापितरंयस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेयमेव
सोग्निर्वैश्वानरोनिपातमेवैतेउत्तरेज्योतिषीएतेननामधेयेन

भजेतेभजेते॥२१॥ ॥इतिपंचमःपादः॥४४॥ ॥इतिसप्तमोऽ
ध्यायःसमाप्तः॥१॥ ॥द्रविणोदाःकस्माद्धनंद्रविणमुच्यतेयदेन
मभिद्रवंतिबलंवाद्रविणंयदेनेनाभिद्रवंतितस्यदाताद्रविणो
दास्तस्यैषाभवति॥१॥ द्रविणोदाद्रविणसोग्रावहस्तासोअध्वरे
यज्ञेषुदेवमीळते॥द्रविणोदायस्त्वंद्रविणसइतिद्रविणसादिनइ

त्तिवाद्रविणसानिनइतिवाद्रविणसस्तस्मात्पिबत्वितिवा॥ यज्ञेषु
देवमीळते॥ याचंतिस्तुवंतिवर्द्धयंतिपूजयंतीतिवा तत्कोद्रविणो
दाः इंद्रइतिक्रौष्टुकिः सः बलधनयोर्दातृतमस्तस्यचसर्वाबलकृ
तिरोजसोजातमुतमन्यएनमितिचाहाथाप्यग्निंद्राविणोदमाहै स२
षपुनरेतस्माज्जायते॥ योअश्मनोरंतरग्निंजजानेत्यपिनिगमो

भवत्यथाप्यृतुयाजेषुद्राविणोदसाःप्रवादाभवंतितेषांपुनःपात्रस्यैंद्र
पानमितिभवत्यथाप्येनंसोमपानेनस्तौत्यथाप्याह द्रविणोदाःपि
बतुद्राविणोदसइति॥२॥ अयमेवाग्निर्द्रविणोदाइतिशाकपूणिरा
ग्नेयेष्वेवहिसूक्तेषुद्राविणोदसाःप्रवादाभवंति॥ देवाअग्निंधारयं
द्रविणोदामित्यपिनिगमोभवति॥ यथोएतत्सबलधनयोर्दातृतम

च्यते

२७ इतिसर्वासुदेवतास्वैश्वर्यंविपृथोएतदोजसोजातमुतमन्यएनमि
तिचाहैष्यमप्यग्निरोजसाबलेनमथ्यमानोजायतेतस्मादेनमाह
सहसस्पुत्रंसहसःसूनुंसहसोयहुंयथोएतदग्निंद्राविणोदसमा हुं २
हेत्युत्विजोत्रद्रविणोदसउच्यंतेहविषोदातारस्तेचैनंजनयंति।ऋ
षीणांपुत्रोअधिराजएषइत्यपिनिगमोभवति॥यथोएतत्तेषांपुनः २७

पात्रस्येंद्रपानमितिभवतीतिभक्तिमात्रंतद्भवतियथावायव्यानीति
सर्वेषांसोमपात्राणांयथोएतत्सोमपानेनैनंस्तौतीत्यस्मिन्नप्येतदु
पपद्यते॥सोमंपिबमंदसानोगणश्रिभिरितियथोएतद्द्रविणोदाः।
पिबतुद्राविणोदसइत्यस्यैवतद्भवति॥३॥मेद्यंतुतेवह्नयोयेभिरी
यसेरिषण्यन्वीलयस्वावनँते॥आयूयाधृष्णोअभिगूर्यात्वंनेष्ट्रा।

स्प

त्सोमंद्रविणोदः पिबऋतुभिः ॥ मेद्यंतुतेवह्नयोवोढारोयेर्यास्य ।
रिष्यंदृढीभवायूयधृष्णोअभिगूर्यत्वंनेष्ट्रीयाद्धिष्ण्याद्धिष्ण्योधि
षण्योधिषणाभवोधिषणाधिषेर्दधात्यर्थेधीसादिनीतिवाधीसा
निनीतिवावनस्पत[illegible]इत्येनमाहेषहिवनानांपातावापालयितावा
वनंवनोतेः पिपर्तुभिः कालैः ॥४॥ ॥ प्रथमः पादः ॥ ॥ अथातआ

प्रियआप्रियः कस्मादाप्नोतेः प्रीणातेर्वाप्रीभिराप्रीणातीतिचब्राह्म
णंतासामिध्मः प्रथमागामीभवतीध्मः समिंधनात्तस्यैषाभवति ॥५॥
समिद्धोअद्यमनुषोदुरोणेदेवोदेवान्यजसिजातवेदः ॥ आचवहमि
त्रमहश्चिकित्वांत्वंदूतः कविरसिप्रचेताः ॥ समिद्धोअद्यमनुस्य ष्य२
मनुष्यस्यगृहेदेवोदेवान्यजसिजातवेद आचवहमित्रमँश्चिकि

२९ स्वाँश्चेतनावाँस्त्वंहूतःकविरसिप्रवृद्धचेतायज्ञेध्मइतित्थक्योग्नि का १
रितिशाकपूणिस्तनूनपान्नपादित्यननंतरायाःप्रजायानामधे
यंनिर्णततमाभवतिगौरत्रतनूरुच्यतेततास्यांभोगास्तस्याः
पयोजायतेपयसआज्यंजायतेऽग्निरितिशाकपूणिरापोत्रतन्वउ
च्यंतेतताअंतरिक्षेताभ्यओषधीवनस्पतयोजायंतेओषधिवन २९

स्पतिभ्यएषजायतेतस्यैषाभवति ॥ २ ॥ तनूनपात्पथऋतस्यया
नान्मध्वासमंजंत्स्वदयासुजिह्व । मन्मानिधीभिरुतयज्ञमृं
धंदेवत्राचकृणुह्यध्वरंनः ॥ तनूनपात्पथऋतस्ययानान्यज्ञस्य तू २
यानान्मधुनासमंजंत्स्वदयकल्याणजिह्वमननानिचनोधीभि
र्यज्ञंचसमर्द्धयदेवान्नोयज्ञंगमयनराशंसोयज्ञइतिकात्थक्यो

३० नराअस्मिन्नासीनाःशंसंत्यग्निरितिशाकपूणिर्नरैःप्रशस्योभवतितस्यैषा
भवति ॥३॥ नराशंसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः ॥
के२ येसुक्रतवःशुचयोधियंधाःस्वदंतिदेवाउभयानिहव्यानराशंसस्यमहि
मानमेषामुपस्तुमोयज्ञियस्ययज्ञैर्येसुकर्माणःशुचयोधियंधारयितारः
स्वदयंतुदेवाउभयानिहवींषिसोमंचेतराणिचेतिवातांत्राणिचावापिका ३०

निचेतिवेलईट्टेःस्तुतिकर्मणइंधतेर्वातस्यैषाभवति ॥४॥ आजुह्वानई
ड्योवंद्यश्चायाह्यग्नेवसुभिःसजोषाः ॥ त्वंदेवानामसियह्वहोतासए
नान्यक्षीषितोयजीयान् ॥ आहूयमानईळितव्योवंदितव्यश्चायाह्य
ग्नेवसुभिःसहजोषणस्त्वंदेवानामसियह्वहोतायह्वइतिमहतो
नामधेयंजातश्चहूतश्चभवति ॥ सएनान्यक्षीषितोयजीयान् ॥ इषि

३१

तःप्रेषितइतिवाऽधीष्टइतिवायजीयान्यष्टृतरोबर्हिःपरिबर्हणात्तस्यैषाभ
वति॥प्र॥प्राचीनंबर्हिःप्रदिशापृथिव्यावस्तोरस्यावृज्यतेऽअग्रेऽअह्नां॥
व्युप्रथतेवितरंवरीयोदेवेभ्योअदितयेस्योनम्॥प्राचीनंबर्हिःप्रदिशा
पृथिव्यावसनायास्याःप्रवृज्यतेऽ[illegible]ग्रेह्नांबर्हिःपूर्वाह्णेतद्विप्रथतेवि
कीर्णतरमितिवाविस्तीर्णतरमितिवावरीयोवरतरमुरुतरंवादेवेभ्य ३१

त्ये
श्चादितयेचस्योनंस्योनमितिसुखनामस्यतेरवस्यंतैत्सेवितव्यंभव
तीतिवाद्वारोजवतेर्वाद्रवतेर्वावारयतेर्वातासामेषाभवति॥६॥व्यच
स्वतीरुर्वियाविश्रयन्तांपतिभ्योनजनयःशुंभमानाः॥देवीर्द्वारोबृहती
र्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः॥व्यंचनवत्यउरुत्वेनविश्रयंतांप
तिभ्यइवजायाऊरूमैथुनेधर्मेशुशोभिषमाणावरतरमंगमूरूदेव्यो

३२ द्वारोबृहत्योमहत्योविश्वमिन्वाविश्वमाभिरेतियज्ञेगृहद्वारइतिकात्थ
क्योग्निरितिशाकपूणिरुषासानक्तोषाश्चनक्ताचोषाव्याख्यातानक्तेति
रात्रिनामानक्तिभूतान्यवश्यायेनापिवानक्ताव्यक्तवर्णातयोरेषाभवति
॥७॥आसुष्वयंतीयजतेउपाकेउषासानक्तासदतांनियोनौ॥दिव्येयोष
णेबृहतीसुरुक्मेअधिश्रियंशुक्रपिशंदधाने॥सेष्मीयमाणेइतिवासु ३२

ष्वापयंत्यावितिवासीदतामितिवान्यासीदतामितिवायज्ञियेउपक्रांते
दिव्येयोषणेबृहत्यौमहत्यौसुरुक्मेसुरोचनेअधिदधानेशुक्रपेशसं
श्रियंशुक्रंशोचतेर्ज्वलतिकर्मणःपेशइतिरूपनामपिंशतेर्विपिंशितंभ
वतिदैव्याहोतारादैव्यौहोतारावयंचाग्निरसौचमध्यमस्तयोरेषाभव
ति॥८॥दैव्याहोताराप्रथमासुवाचामिमानायज्ञंमनुषोयजध्यै॥प्रचो

३३

दयेंताविदथेषुकारूप्राचीनंज्योतिःप्रदिशादिशंता॥दैव्यौहोतारौप्रथमौ
सुवाचौनिर्मिमानौयज्ञंमनुष्यस्यमनुष्यस्ययजेयजनायप्रचोदयमानौ
यज्ञेषुकर्त्तारौपूर्वस्यांशिदियष्टव्यमितिप्रदिशंतौतिस्रोदेवीस्तिस्रोदे
व्यस्तासामेषाभवति॥९॥आनोयज्ञंभारतीतूयमेत्विलामनुष्वदिह
चेतयंती॥तिस्रोदेवीर्बर्हिरेदंस्योनंसरस्वतीस्वपसःसदंतु॥एतुनोय-

३३

ज्ञंभारतीक्षिप्रंभरतआदित्यस्तस्यभाइलाचमनुष्यवदिहचेतयमाना
तिस्रोदेव्योबर्हिरिदंसुखंसरस्वतीचसुकर्माणआसीदंतुत्वष्टात्तूर्णम
श्नुतइतिनैरुक्तास्त्विषेर्वास्यादीप्तिकर्मणस्तक्षतेर्वास्यात्करोतिकर्म
णस्तस्यैषाभवति॥१०॥यइमेद्यावापृथिवीजनित्रीरूपैरपिंशद्भुव-
नानिविश्वा॥तमद्यहोतरिषितोयजीयांदेवंत्वष्टारमिहयक्षिविद्वा

न॥यइमेद्यावापृथिव्यौजनयित्र्यौरूपैरकरोद्भूतानिचसर्वाणितमद्यहो
तरिषितोयजीयान्देवंत्वष्टारमिहयजविद्वान्माध्यमकस्त्वष्टेत्याहुर्म
ध्यमेचस्थानेसमाम्नातोग्निरितिशाकपूणिस्तस्यैषापराभवति॥११
॥आविष्ट्योवर्द्धतेचारुरासुजिह्मानामूर्द्ध्वःस्वयशाउपस्थे॥उभेत्वष्टु
र्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेते॥आविरावेदनात्तसो

वर्द्धतेचारुरासुचारुचरतेर्जिह्मंजिहीतेरूर्द्ध्वमुद्धतंभवतिस्वयशाआत्म
यशाउपस्थउपस्थाने॥उभेत्वष्टुर्बिभ्यतुर्जायमानात्॥द्यावापृथिव्या^
वितिवाहोरात्रेइतिवारणीइतिवाप्रत्यक्तेसिंहंसहनंप्रत्यासेवेते॥१२
॥द्वितीयस्यद्वितीयःपादः॥ ॥वनस्पतिर्व्याख्यातस्तस्यैषाभवति॥१
॥उपावसृजत्मन्यासमंजंदेवानांपाथऋतुथाहवींषि॥वनस्पतिःशमिता

३५ देवोअग्निःस्वदंतुहव्यंमधुनाघृतेन॥उपवसृजात्मनात्मन्यासमंजंदे
वानामन्नमृतावृतौहवींषिकालेकालेवनस्पतिःशमितादेवोअग्निरित्ये
३३ तेस्त्रंयःस्वदयंतुहव्यंमधुनाचघृतेनचतत्कोवनस्पतिर्यूपइतिकात्थ
क्योग्निरितिशाकपूणिस्तस्यैषापराभवति॥१॥अंजंतित्वामध्वरेदेवयं
तोवनस्पतेमधुनादैव्येन॥यदूर्ध्वस्तिष्ठाद्रविणेहधत्ताद्यद्वाक्षयोमातुर ३५

स्याउपस्थे॥अंजंतित्वामध्वरेदेवान्कामयमानावनस्पतेमधुनादैव्येन
घृतेनचयदूर्ध्वस्थास्यसिद्रविणानिचनोधास्यसियद्वातेकृतःक्षयोमा
ने२ तुरस्याउपस्थउपस्थाग्निरितिशाकपूणिस्तस्यैषापराभवति॥३॥देवे
भ्योवनस्पतेहवींषिहिरण्यपर्णप्रदिवस्तेअर्थम्॥प्रदक्षिणिद्रशनया
नियूयऋतस्यवक्षिपथिभीरजिष्ठैः॥देवेभ्योवनस्पतेहवींषिहिरण्य

३६ पर्णस्तत पर्णापि वोमममार्थस्याद्धिरण्यवर्णाप र्णेति प्रद्धिवस्तेऽअर्थंपुराणस्ते
सोर्थेयंते शब्रूमोयज्ञस्यवहपथिभीरजिष्ठैर्ऋजुतमैरजस्वलतमैःप्रपि
ष्ठतमैरितिवातस्यैषापराभवति॥४॥वनस्पतेरशनयानियूयपिष्टतम
यावयुनानिविद्वान्॥वहादेवत्रादिधिषोहवींषिप्रचदातारममृतेषु
वोचः॥वनस्पतेरशनयानियूयसुरूपतमयावयुनानिविद्वान्प्रज्ञाना ३६

निप्रजानन्वहदेवांदातुर्हवींषिप्रब्रूहि च दातारममृतेषुदेवेषुस्वाहा॥
कृतयःस्वाहेत्येतत्सुआहेतिवास्वावागाहेतिवास्वंप्राहेतिवास्वाहु
तंहविर्जुहोतीतिवा॥तासामेषाभवति॥५॥सद्योजातोव्यमिमीतय
ज्ञमग्निर्देवानामभवत्पुरोगाः॥अस्यहोतुःप्रदिश्यृतस्यवाचिस्वा॥
हाकृतंहविरदंतुदेवाः॥सद्योजायमानोनिरमिमीतयज्ञमग्निर्दे॥

३७ वानामभवतुरोगाम्यस्यहोतुःप्रदिश्यस्तस्यवाचास्येस्वाहाकृ
तंहविरदंतुदेवाइतीमाआप्रीदेवत्ताअनुक्रांताअथकिंदेवताः ता
प्रयाजानुयाजाआग्नेयाइत्येके॥६॥प्रयाजान्मेअनुयाजांश्चकेव
लानूर्जस्वंतंहविषोदत्तभागम्॥घृतंचापांपुरुषंचौषधीनाम
ग्नेश्चदीर्घमायुरस्तुदेवाः॥तवप्रयाजाअनुयाजाश्चकेवलऊ ३७

र्जस्वंतोहविषःसंतुभागाः॥तवाग्नेयज्ञोऽयमस्तुसर्वस्तुभ्यंनमंता
प्रदिशश्चतस्रः॥आग्नेयावैप्रयाजाआग्नेयाअनुयाजाइतिच
ब्राह्मणंछंदोदेवताइत्यपरंछंदांसिवैप्रयाजाश्छंदांस्यनुयाजा
इतिचब्राह्मणमृतुदेवताइत्यपरमृतवोवैप्रयाजाःपशवोनुया
जाइतिचब्राह्मणंप्राणदेवताइत्यपरंप्राणावैप्रयाजाअपाना

ऋतुयाजाइतिचब्राह्मणमात्मदेवताइत्यपरमात्मावैप्र~~ज~~याजाः
प्रजानुया~~सु~~जाइतिचब्राह्मणमाग्नेयाइतितुस्थितिर्भक्तिमात्रमि
तरत्किमर्थंपुनरिदमुच्यतेयस्यैदेवतायैहविर्गृहीतंस्यात्तांमनसा
ध्यायेद्वषट्करिष्यन्नितिहविज्ञायतेतान्येतान्येकादशाप्रीसूक्ता
नितेषांवासिष्ठमात्रेयंवाध्र्यश्वंगार्त्समदमितिनाराशंसवंतिमेधा

तिथंदैर्घतमसंप्रैषिकमित्युभयवंत्यतोन्यानितनूनपात्वंतितनून
पात्वंति॥७॥ ॥द्वितीयस्यतृतीयःपादः॥ ॥अष्टमोऽध्यायसमाप्तः
॥अथयानिपृथिव्यायतनानिसत्वानिस्तुतिंलभंतेतान्यतोनुक्रमि
ष्यामस्तेषामश्वःप्रथमागामीभवत्यश्वोव्याख्यातस्तस्यैषाभवति
॥१॥अश्वोवोळ्हासुखंरथंहसनामुपमंत्रिणः॥शेपोरोमण्वंतौभे

एं २

३र्ध दैवारिन्मंडूकइछतीन्द्रोयेंद्रोपरिस्रव॥अश्वोवोढासुखंवोढासु
ख२ खमितिकल्याणनामकल्याणंपुण्यंसुहितंभवतिमानोव्याख्यातस्त
स्यैषाभवति॥३॥मानोमित्रोवरुणोऽर्यमायुरिंद्रऋभुक्षामरुतः
परिख्यन्॥यद्वाजिनोदेवजातस्यसप्तेःप्रवक्ष्यामोविदथेवीर्या
णि॥यद्वाजिनोदेवजातस्यसप्तेःसरणस्यप्रवक्ष्यामोयज्ञेविदथे ३र्ध

वीर्याणि मानस्त्वंमित्रश्चवरुणश्चार्यमाचायुश्चवायुरयनइंद्रश्चोरु
क्षयणऋभूणांराजेतिवामरुतश्चपरिख्यंछकुभिः शक्नोत्सुन्नेतुमा
त्मानंशक्नोतिनद्धितुमितिवाशक्नोतितकितुमितिवासर्वतःशंक्नो
स्त्वितिवाशक्नोतेर्वीतस्यैषाभवति॥४॥कनिक्रदज्जनुषंप्रब्रुवाण
इयर्त्तिवाचमरितेवनावम्॥सुमंगलश्चशकुनेभवासिमात्वाका

४० चिदभिभाविश्व्या॥विदत्॥न्यक्रंदीज्जन्मप्रब्रुवाणोयथास्यशब्दस्तथा
नामेरयतिवाचमीरयितेवनावंसुमंगलश्चशकुनेभवकल्याणमं
गलोमंगलंगिरतेर्गृणात्यर्थेगिरत्यनर्थानितिवांगलमंगलवन्मज्ज
यतिपापकमितिनैरुक्तामांगच्छत्वितिवामाचत्वाकाचिदभिभूतिः
सर्वतोविदद्गृत्समदमर्थमभ्युत्थितंकपिंजलोभिभवाशेतदभिवा ४०

दिन्येषगर्भवति॥४॥भद्रंवददक्षिणतोभद्रमुत्तरतोवद॥भद्रंपुर
स्तान्नोवदभद्रंपश्चात्कपिंजल॥इतिसानिगदव्याख्याता॥गृत्सम
दोगृत्सोमदनोगृत्सइतिमेधाविनामगृणातेस्तुतिकर्मणोमंडूका
मज्जूकामज्जनान्मदतेर्वामोदतिकर्मणोमंदतेर्वातृप्तिकर्मणो
मंडयतेरितिवैयाकरणामंडएषामोकइतिवामंडोमदेर्वामुदेर्वा

५१ तेषामेषाभवति ॥५॥ संवत्सरंशशयानाब्राह्मणाव्रतचारिणः ॥ वाचंप
र्जन्यजिन्वितांप्रमंडूकाअवादिषुः ॥ संवत्सरंशयानाब्राह्मणाव्रतचा
रिणोब्रुवाणाइत्यपिवोपमार्थेस्याद्ब्राह्मणाइवव्रतचारिणइतिवाचंप
र्जन्यप्रीतांप्रावादिषुर्मंडूकावसिष्ठोवर्षकामःपर्जन्यंतुष्टावतंमं
डूकाअन्वमोदंतसमंडूकाननुमोदमानांदृष्ट्वातुष्टावतदभिवा ५१

दिन्येषर्ग्भवति ॥६॥ उपप्रवदमंडूकिवर्षमावदताडुरि ॥ मध्येहृदस्य
प्लवस्वविगृह्यचतुरःपद ॥ इतिसानिगदव्याख्याताक्षाअश्नुवंसे
नामितिवाभ्यश्नुवतएनमितिवातेषामेषाभवति ॥७॥ प्रावेँमाबृहतो पा ३
मादयंतिप्रवातेजाइरिणेवर्वृतानाः ॥ सोमस्येवमौजवतस्यभक्षोवि
भीदकोजागृविर्मह्यमच्छान् ॥ प्रवेपिणोर्ममहतोविभीदकस्यफला

व२

४२ निमादयंतिप्रवातेजाःप्रवतेजाइरिणेवर्त्तमानाइरिणंनिरिणंरिणातेर
पार्णंभवत्यपरताअस्मादोषधयइतिवामौञ्जवतोमुञ्जवतिजातो
मुजवान्पर्वतोमुंजवान्मुंजोविमुच्यतइषीकैषतेर्गतिकर्मणइयमपी प२षीके
तरेषीकैतस्मादेवविभीदकोविभेदनाज्जागृविर्जागरणान्मह्यम
वच्छदत्स्वशंसस्येनाम्यपमयानिंदस्तुत्तराभिन्नेषेरक्षपरिद्युतस्ये ४२

सा॰१

तदा[illegible]र्षविदयंतेग्रावाणोहंतेर्वागृणातेर्वागृह्णातेर्वातेषामेषाभवति॥
ए॥ प्रैतेवदंतुप्रवयंवदामग्रावभ्योवाचंवदतावदद्भ्यः॥यदद्रयःप
र्वताःसाकमाशवश्लोकंघोषंभरथेंद्रायसोमिनः॥प्रवदंत्वेतेप्रवदा
मवयंग्रावभ्योवाचंवदतवदद्भ्योयदद्रयःपर्वताआदरणीयाःस
हसोमममाशवःक्षिप्रकारिणःश्लोकःशृणोतेर्घोषोघुष्यतेःसोमिनो

४३

यूपंस्छेतिवासोमिनोगृहेष्वितिवायेननराःप्रशस्यंतेसनाराशंसोमं
त्रस्तस्यैषाभवति॥९॥अमंदान्स्तोमान्प्रभरेमनीषासिंधावधिक्षि
यतोभाव्यस्य।योमेसहस्रममिमीतसवानतूर्त्तोराजाश्रवइछमा
नः॥अमंदान्स्तोमानबालिशाननल्पान्वाबालोबलवर्त्तीभर्त्तव्यो
भवत्यंबास्माअलंभवतीतिवाबास्मैबलंभवतीतिवाबलोवाप्र

द्वा २

भवयो

४३

त्तिषेधव्यवहितःप्रभरेमनीषेमनीषयामनसइषयास्तुत्याप्रज्ञया
वासिंधावधिनिवसतोभावयव्यस्यराज्ञोयोमेसहस्रंनिरमिमी
तसवानतूर्त्तोराजातूर्णइतिवात्वरमाणइतिवाप्रशंसामिच्छमानः॥
१०॥ तृतीयःप्रथमःपादः॥ ॥यज्ञसंयोगाद्राजास्तुतिंलभेत
राजसंयोगाद्युद्धोपकरणानितेषांरथःप्रथमागामीभवतिर

ए३

यो रंहते गतिकर्मणः स्थिरते वी स्याद्विपरीतस्य रममाणो स्मिंस्तिष्ठ
तीति वा रपते वी तस्यैषा भवति ॥१॥ वनस्पते वीड्वंगो हि भूया अ
स्मत्सखा प्रतरणः सुवीरः ॥ गोभिः सन्नद्धो असि वीळयस्वास्था
ता ते जयतु जेत्वानि ॥ वनस्पते दृल्हांगो हि भवास्मत्सखा प्रतर
णः सुवीरः कल्याणवीरो गोभिः सन्नद्धो असि वीळयस्वेति संस्त

त
भस्वास्थाता ते जयतु जेत्वानि दुंदुभिरिति शब्दानुकरणं द्रुमो भि
न्न इति वा दुंदुभ्यते वी स्याच्छब्दकर्मणस्तस्यैषा भवति ॥२॥ उप
श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ॥ स दुंदु
भे सजूरिंद्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥ उपश्वासय पृ
थिवीं च दिवं च बहुधा ते घोषं मन्यतां विष्ठितं स्थावरं जगमं च यस्

तू
४५ डुंदुभेसहजोषणइंद्रेणचदेवैश्च दूराद्दूरतरमपसेधशत्रूनिषुधि
रिषूणांनिधानंतस्यैषाभवति॥३॥बह्वीनांपिताबहुरस्यपुत्र
श्चिश्चाकृणोतिसमनावगत्य॥इषुधिःसंकाःपृतनाश्चसर्वाः
पृष्ठेनिनद्धोजयतिप्रसूतः॥बह्वीनांपिताबहुरस्यपुत्रइती
षूनभिप्रेत्यप्रस्मयतइतिवावघ्रीयमाणःशब्दानुकरणंवासं। ४५

१
काःसंतैःसंपृवीद्वाकिरतेःपृष्ठेनिनद्धोजयतिप्रसूतइतिव्याख्या
तंहस्तघ्नोहस्तेहन्यतेतस्यैषाभवति॥४॥अहिरिवभोगैःपर्ये
तिबाहुंज्यायाहेतिंपरिबाधमानः॥हस्तघ्नोविश्वावयुनानि।
विद्वान्पुमान्पुमांसंपरिपातुविश्वतः॥अहिरिवभोगैःपरिवेष्टय
तिबाहुंज्यायावधात्परित्रायमाणोहस्तघ्नःसर्वाणिप्रज्ञानानि

प्रजानन्सुरूमनाभवतिहंसतेर्वाभिशवोव्याख्यातास्तेषामेषाभव॰
ति॥५॥रथेतिष्ठन्नयतिवाजिनःपुरोयत्रयत्रकामयतेसुषारथिः॥
अभीशूनांमहिमानंपनायतमनःपश्चादनुयच्छंतिरश्मयः॥रथे
तिष्ठंन्नयतिवाजिनःपुरुस्तात्सतोयत्रयत्रकामयतेसुषारथिः॰
कल्याणसारथिरभीशूनांमहिमानंपूजयतमनःपश्चात्सतोनुयच्छं

तिरश्मयोधनुर्धन्वतेर्गतिकर्मणोवधकर्मणोवाधन्वंसस्मादिषव
स्तस्यैषाभवति॥६॥धन्वनागाधन्वनाजिंजयेमधन्वनातीव्राःस
मदोजयेम॥धनुःशत्रोरपकामंकृणोतिधन्वनासर्वाःप्रदिशोज
येम॥इतिसानिगदव्याख्याता॥समदःसमदोवात्तेःसंमदोवा
मदतेर्ज्याजयतेर्वाजिनातेर्वाप्रजावयतीषूनितिवातस्याएषाभ

४७ वति॥७॥ वक्ष्यंतीवेदागनीगंतिकर्णंप्रियंसखायंपरिषस्वजाना॥
योषेवशिंक्तेवितताधिधन्वंज्याइयंसमनेपारयंती॥ वक्ष्यंतीवाग
छति कर्णं प्रियमिवसखायमिषुंपरिष्वजमानायोषेवशब्दंकरो
तिवितताधिधनुषिज्या यंसमनेसंग्रामेपारयंतीषूरीषतेर्गतिकर्म
णस्तस्यैषाभवति॥८॥ सुपर्णंवस्तेमृगोअस्यादंतोगोभिःसन्नद्धा ४७

पततिप्रसूता॥ यत्रानरःसंचविचद्रवंतितत्रास्मभ्यमिषवःशर्मयंस
न्॥ सुपर्णंवस्तइतिवाजानभिप्रेत्यमृगमयोस्यादंतोमृगमयतेर्वा
गोभिःसन्नद्धापततिप्रसूतेतिव्याख्यातंयत्रनराःसंद्रवंतिचविद्र
वंतिचतत्रास्मभ्यमिषवःशर्मयच्छंतुशरणंसंग्राष्वश्वाजनींकशे मे२
त्याहुःकशाप्रकाशयतिभयमश्वायकृषतेर्वाणुभावाद्वाक्पुनः॥

४८

प्रकाशयत्यर्थान्खशयाक्रोशतेर्वाश्वकशायाएषाभवति॥१९॥आ
जंघंतिसान्वेषांजघनांउपजिघ्नते॥अश्वाजनिप्रचेतसोश्वांत्स
मत्सुचोदय॥आघ्नंतिसानून्येषांसरणानिसक्थीनिसक्थिःसच
तेरासक्तोस्मिन्कायोजघनानिचोपघ्नंतिजघनंजंघंन्यतेरश्वाज
निप्रवृद्धचेतसोश्वांसमत्सुसमरैषुसंग्रामेषुचोदयोलूखलमु ४८

ते

रुकरंवोर्ध्वखंवोर्करंवोरुमेकुर्वित्यस्यैब्रवीत्तदुलूखलमभवदु
रुकरंवैतत्तदुलूखलमित्याचक्षतेपरोक्षेणेतिचब्राह्मणंतस्यै
षाभवति॥२०॥यच्चिद्धित्वंगृहेगृहउलूखलकयुज्यसे॥इह
द्युमत्तमंवदजयतामिवदुंदुभिः॥इतिसानिगदव्याख्याता॥
२१॥ ॥तृतीयद्वितीयःपादः॥ ॥वृषभःप्रजांवर्षतीतिवातिबृह

४९ तिरेतइतिवातद्वृषकर्मीवर्षणाद्वृषभस्तस्यैषाभवति ॥१॥ न्यक्रं
५ दयंनुयंतएनममेहयन्वृषभंमध्यआजेः ॥ तेनसूभर्वंशतवत्सहस्रं
गवांमुद्गलःप्रधनेजिगाय ॥ न्यक्रंदयंनुपयंतएनमिमिव्याख्यातम ति
मेहयन्वृषभंमध्यआजयनस्याजवनस्येतिवातेनसुभर्वंराज्ञानंभ
र्वतिरत्तिकर्मातद्वासुभर्वंसहस्रंगवांमुद्गलःप्रधनेजिगायप्रधन ४९

भा २

इतिसंग्रामनामप्रकीर्णान्यस्मिंधनानिभवंतिद्रुघणोद्रुममयोघनस्त
ध् त्रेतिहासमाचक्षतेमुद्गलोभार्म्यश्वऋषिर्वृषभंचद्रुघणंचयुक्त्वासंग्रामेव्य
वहृत्याजिंजिगायतदभिवादिन्येषर्ग्भवति ॥२॥ इमंतंपश्यवृषभस्य
युंजंकाष्ठायामध्येद्रुघणंशयानं ॥ येनजिगायशतवत्सहस्रंगवांमु
नि॰१ द्गलःपृतनाज्येषु ॥ इमंतंपश्यवृषभस्यसहयुंजंकाष्ठायामध्येद्रुघणं

भ

५० शयानंयेनजिगायशतवत्सहस्रंगवांमुद्गलःपृतनाज्येषुपृतनाज्यमि
तिसंग्रामनामपृतनानामजनाद्वाजयनाद्वामुद्गलोमुद्गवान्मुद्ग
गिलोमदनंगिलतीतिवामदंगिलोवामुदंगिलोवाभार्म्यश्वोभृ
म्यश्वस्यपुत्रोभृम्यश्वोभृमयोस्याश्वाअश्वभरणाद्वापितुरित्यन्न
नामपातेर्वापिबतेर्वाप्यायतेर्वातस्यैषाभवति॥३॥पितुन्नुस्तोषंम ५०

होधर्माणंतविषीं॥यस्यत्रितोव्योजसावृत्रंविपर्वमर्दयत्॥तंपितुंस्तौ
मिर्महतोधारयितारंबलस्यतविषीतिबलनामतवतेर्वृद्धिकर्मणोय त२
स्यत्रितोव्योजसाबलेनत्रितस्त्रिस्थानइंद्रोवृत्रंविपर्वाणंव्यर्दयतिन
द्योव्याख्यातास्तासामेषाभवति॥४॥इमंमेगंगेयमुनेसरस्वतिशु
तुद्रिस्तोमंसचतापरुष्ण्या॥असिक्न्यामरुद्वृधेवितस्तयार्जीकीये

५१ श्टणुह्यासुषोमया॥इमंमेगंगेयमुनेसरस्वतिशुतुद्रिपरुष्णि॥स्तोममा नु १
सेवध्वमसिक्न्याचसहमरुद्वृधेवितस्तयाचार्जीकीयआशृणुहि
क ३. सुषोमयाचेतिसमस्तार्थोथैंपदंनिरुक्तंगंगागमनाद्यमुनाप्रयु
वतीगच्छतीतिवाप्रवियुतंगच्छतीतिवासरस्वतीसरइत्युदकनामस
र्तेस्तद्वतीशुतुद्रीशुद्राविणीक्षिप्रद्राविण्याशुतुन्नेवद्रवतीतिइरा ५१

रु २

वतींपरुष्णीत्याहुःपर्ववतीकुटिलगामिन्यसिक्न्यशुक्लासितासितमितिव
र्णनामतत्प्रतिषेधोसितंमरुद्वृधःसर्वानद्योमरुतएनावर्द्धयंतिवितस्ताविद
ग्धाविवृद्धामहाकूलार्जीकीयांविपालित्याहुरृजीकप्रभवावाऋजुगामिनी।
वाविपाड्विपाटनाद्वाविपाशनाद्वाविप्रापणाद्वापाशाअस्यांव्यपाश्यंतवसि
ष्ठस्यमुमूर्षतस्तस्माद्विपालुच्यतेपूर्वमासीदुरुंजिरासुषोमासिंधुर्यदेनाम

स्त्रा२न

५२

भिप्रस्रुवंतिनद्यःसिंधुःस्यंदनादापआप्नोतेस्तासामेषाभवति॥५॥आपो
हिष्ठमयोभुवंऊर्ज्जेदधातन॥महेरणायचक्षसे॥आपोहिस्थसुखभुव॰ स्ता२
नोन्नायधत्तमहतेचनोरणायरमणीयायदर्शनायौषधयओषंधयंतीतिवौ
षस्येनाधयंतीतिवादोषंधयंतीतिवातासामेषाभवति॥६॥याओषधीः
पूर्वाजातादेवेभ्यस्त्रियुगंपुरा॥मनैनुबभ्रूणामहंशतंधामानिसप्तच॥

५२

ता२

याओषधयःपूर्वाजातादेवेभ्यस्त्रीणियुगानिपुरामन्येनुतद्बभ्रूणामहंबभ्रु
वर्णानांभरणानांहरणानामितिवा॥शतंधामानिसप्तच॥धामानित्रयाणि
भवंतिस्थानानिनामानिजन्मानीतिस्थानान्यत्राभिप्रेतानिसप्तशतंपुरुषस्य
मर्मणांतेष्वेनादधतीतिवारात्रिर्व्याख्यातातस्याएषाभवति॥७॥आरात्रि
पार्थिवंरजःपितुरप्रायिधामभिः॥दिवःसदांसिबृहतीवितिष्ठसआत्वेषं

५३

ह
वर्त्ततेतमः॥आपूपुरस्त्वंरात्रिपार्थिवंरजस्थानैर्मध्यमस्यदिवःसदांसिबृंतीम
हतीवितिष्ठसआवर्त्ततेत्वेषंतमोरजोरण्यान्यरण्यायैंपत्न्यरण्यमपार्णंग्रामाद स्य २
रमणंभवतीतिवातस्याएषाभवति॥८॥अरण्यान्यरण्यान्यसौयाप्रेवनश्यसि
॥कथाग्रामंनपृच्छसिनत्वाभीरिवविंदतीँ ३॥अरण्यानीत्येनामामंत्रयतेयासा
वरण्यानिवनानिपराचीवनश्यसिकथंग्रामंनपृच्छसिनत्वाभीर्विंदतीवेति ५३

वःपरिभयार्थेवाश्रद्धाःश्रद्धानात्तस्याएषाभवति॥९॥श्रद्धयाग्निःसमिध्य
तेश्रद्धयाहूयतेहविः॥श्रद्धांभगस्यमूर्द्धनिवचसावेदयामसि॥श्र
द्धयाग्निःसाधुःसमिध्यतेश्रद्धयाहविःसाधुहूँतेश्रद्धांभगस्यभागधेय य
स्यमूर्द्धनिप्रधानांगेवचनेनावेयामः॥पृथिवीव्याख्यातातस्याएषाभव
ति॥१०॥स्योनापृथिविनोभवाऽनृक्षरानिवेशनी॥यच्छानःशर्मसप्रथः॥

द

५४

क्ष छ
सुखानःपृथिविभवानृक्षरानिवेशान्पृछरःकंटकऋस्रतेःकंटकःकंतपो
वाकृंततेर्वाकंटतेर्वास्याद्गतिकर्मणउद्गततमोभवतियछनःशर्मयछं
तुशरणंसर्वतःपृथ्वघाव्याख्यातातस्याएषाभवति॥३१॥अमीषांचित्तंप
तिलोभयंतीगृहाणांगान्यप्वेपरेहि॥अभिप्रेहिनिर्दहहृत्सुशोकैरंधेना
मित्रांस्तमसासचंताम्॥अमीषांचित्तानिप्रतिलोभयमानागृहाणां

५४

गान्यप्वेपरेह्यभिप्रेहिनिर्दहैषांहृदयानिशोकैरंधेनामित्रास्तमसासंसेव्यं
तामग्नाय्यग्नेःपत्नीतस्याएषाभवति॥३२॥इहेंद्राणीमुपह्वयेवरुणानींस्व
स्तये॥अग्नायींसोमपीतये॥इतिसानिगदव्याख्याता॥३३॥तृतीयस्यः
तृतीयःपादः॥ ॥अथातोष्टौद्वंद्वान्युलूखलंव्याख्यातंमुसलंमुहुःस
रंतयोरेषाभवति॥१॥आयजीवाजसातमाताह्यु३च्चाविजर्भृतः॥हरीइ

नि

वांधांसि वक्षतां ॥ आपश्च्ये अन्नानां संभक्तमेतेह्युवे विंद्रिये
ने हरीइवांधानि भुंजाने हविर्धाने हविषां निधाने तयोरेषा भवति
॥ २ ॥ आ वामुपस्थमद्रुहा देवाः सीदंतु यज्ञियाः ॥ इहाद्य सोमपी
तये ॥ आसीदंतु वामुपस्थउपस्थानं यज्ञिया देवा यज्ञसंपादि
न इहाद्य सोमपानाय द्यावापृथिव्यौ व्याख्याते तयोरेषा भवति

॥ ३ ॥ द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशं ॥ यज्ञं देवेषु य
च्छतां ॥ द्यावापृथिव्यौ न इमं साधनमद्य दिविस्पृशं यज्ञं देवेषु नि
यच्छतां विपाट्छुतुद्र्यौ व्याख्याते तयोरेषा भवति ॥ ४ ॥ प्र पर्वतानामु
शती उपस्थादश्वे इव विषिते हासमाने ॥ गावेव शुभ्रे मातरा रि
हाणे विपाट्छुतुद्री पयसा जवेते ॥ पर्वतानामुपस्थादुपस्थाना

रि२

५६ रुशत्यौ कामयमाने अश्वेइव विमुक्ते इति वा विषंते इति वा हस
माने हासे इति स्पर्द्धायां हर्षमाणे वा गावा वा विंशोभने संमातरौ रिहा व२
णे विपाट् शुतुद्री पयसा जूते आर्त्नी आर्त्न्यौ वारण्यौ वारिण्यौ वे२
वा तयोरेषा भवति ॥५॥ ते आचरंती समनेव योषा मातेव पुत्रं बि
भृतामुपस्थे ॥ अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरं ५६
ष२

ती अमित्रान् ॥ ते आचरंत्यौ समनसाविव योषे मातेव पुत्रं बिभृता
मुपस्थ उपस्थाने पशत्रून्विध्यतां संविदाने आर्त्न्यौ विमे विघ्नत्या
वमित्रांछुनासीरौ शुनो वायुः शु एत्यंतरिक्षे सीर आदित्यः सर
णात् तयोरेषा भवति ॥६॥ शुनासीराविमां वाचं जुषेथां यद्दिवि च
क्रथुपयः ॥ तेनेमामुपसिंचतम् ॥ इति सा निगदव्याख्याता बीजो

ष्ट्रीदेव्यौजोषयित्र्यौद्यावापृथिव्यावितिवाहोरात्रेइतिवासस्यंचसमा
चेतिकालर्छेक्यस्तयोरेषसंप्रैषोभवति॥७॥देवीजोष्ट्रीवसुधितीय
योरन्याघाद्वेषांसि॥यूयवदान्यावक्षद्वसुवार्याणियजमानाय
वसुवनेवसुधेयस्यवीतांयज॥देवीजोष्ट्रीदेव्यौजोषयित्र्यौवसुधा
न्योययोरन्याघानिद्वेषांस्यवयावयत्यावहत्यन्यावसूनिवरनीया

नियजमानायवसुवननायचवसुधानायचवीतांपिबेतांकामयेतां
वायजेतिसंप्रैषोदेवीऊर्ज्जाहुतीदेव्याऊर्ज्जाहुत्यौद्यावापृथिव्या
वितिवाहोरात्रेइतिवासस्यंचसमाचेतिकालर्छेक्युस्तयोरेषसंप्रै
षोभवति॥८॥देवीऊर्ज्जाहुतीइषमूर्जमन्यावक्षत्सग्धिंसपीति
मन्यानवेनपूर्वंदयमानास्यामपुराणेननवंतामूर्जमूर्ज्जाहुती

ऊर्जयमानेअधातांवसुवनेवसुधेयस्यवीतांयज॥देवीऊर्ज्जाहु
तीदेव्याऊर्ज्जाहुत्यावन्नंचरसंचावहन्त्यासहजग्धिंचसह
सपीतिंचान्यानवेनपूर्वंदयमानास्याम्नाणेननवेंतामूर्जमूर्जा
हुतीऊर्जयमानेअधत्तांवसुवननायचवसुधानायचवीतांपि
बेतांकामयेतांवायजेतिसंप्रैषोयजेतिसंप्रैषः॥४३॥ ॥तृतीयस्य

चतुर्थःपादः॥४॥ ॥इतिनवमोऽध्यायः॥ॐ॥अथातोमध्यस्था
नादेवतास्तासांवायुःप्रथमागामीभवतिवायुर्वातेर्वेतेर्वास्याद्ग
तिकर्मणएतेरितिस्थौलाष्ठीविरनर्थकोवकारस्तस्यैषाभवति॥
१॥वायवायाहिदर्शतेमेसोमाअरंकृताः॥तेषांपाहिश्रुधीहवम्॥
वायवायाहिदर्शनीयेमेसोमाअरंकृतास्तेषांपिबशृणुनोह्वान

मितिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति॥२॥ आस
स्राणासःशवसानमछेंद्रंसुचक्रेरथ्यासोअश्वाः॥ अभिश्रवऋ
ज्यंतोवहेयुर्नूचिन्नुवायोरमृतंविदस्येत्॥ आससृवांसोअभिबला
यमानमिंद्रंकल्याणचक्रेरथेयोगायरथ्याअश्वारथस्यवोढा
रऋज्यंतऋजुगामिनोन्नमभिवहेयुर्नवंचपुराणंचश्रवइत्यन्नना

मश्नूयतइतिसतोवायोश्चास्यभक्षोयथानविदस्येदितींद्रप्रधानेत्येके
नैघंटुकंवायुकर्मोभयप्रधानेसपरंवरुणोवृणोतीतिसतस्तस्यैषा
भवति॥३॥ नीचीनबारंवरुणःकबंधंप्रससर्जरोदसीअंतरिक्षम्
॥ तेनविश्वस्यभुवनस्यराजायवंनवृष्टिर्व्युनत्तिभूम॥ नीचीनद्वा
रंवरुणःकबंधंमेघंकवनमुदकंभवतिकमस्मिंधीयततउदकमपि

६०

कबंधमुच्यतेबंधिरनिभृतत्वेकर्मनिभृतंचप्रसजतिद्यावापृथिव्यौचांतरि
क्षंचमहत्वेनतेनसर्वस्यभुवनस्यराजायवमिववृष्टिर्व्युनत्तिभूमिंतस्यै
षापराभवति॥४॥तमूषुसमनागिरापितृणांचमन्मभिः॥नाभाकस्यप्रश
स्तिभिर्यःसिंधूनामुपोदयेसप्तस्वसासमध्यमोनभंतामन्यकेसमे॥तंस्वभि
ष्टीभिसमान्यागिरागीत्यास्तुत्या।पितृणांचमननी [redacted]

स्त

६०

ना ह २

यैस्तोमैर्नाभाकस्यप्रशस्तिभिर्ऋषिर्नाभाकोबभूववैयःस्यंदमानाना
मासामपामुपोदयेसप्तस्वसारमेनंवाग्भिःसमध्यमइतिनिरुच्यते।
थैषएवभवति॥नभंतामन्यकेसमे॥माभूवन्नन्यकेसर्वेयेनोद्विषंति
दुर्धियःपापधियःपापसंकल्पारुद्रोरौतीतिसतोरोरूयमाणोद्रवती
तिवारोदयतेर्वायदरुदत्तद्रुद्रस्यरुद्रत्वमितिकाठकंयदरोदीत्तद्रु

वै २

६।

द्रस्यरुद्रत्वमितिहारिद्रविकंतस्यैषाभवति॥५॥ इमारुद्रायस्थिरधन्वनेगि
रः क्षिप्रेषवेदेवायस्वधान्वे॥ अषाल्हायसहमानायमेधसेतिग्मायुधा
यभरताशृणोतुनः॥ इमारुद्रायदृल्हधन्वनेगिरः क्षिप्रेषवेदेवायान्न
वतेषाल्हायांनैः सहमानायविधात्रेतिग्मायुधायभरतशृणोतुनस्ति
ग्मंतेजनेरुत्साहकर्मणआयुधमायोधनात्तस्यैषापराभवति॥६॥

६।

यातेदिद्युदवसृष्टादिवस्परिक्ष्मयाचरतिपरिसावृणक्तुनः॥ सहस्रंते
स्वपिवातभेषजामानस्तोकेषुतनयेषुरीरिषः॥ यातेदिद्युदवसृष्टा
दिवस्परिदिवोदिर्धिद्युद्यतेवीद्युततेंवीक्ष्मयाचरतिक्ष्मापृथिवीतस्यां
चरतितयाचरतिविक्ष्मापयंतीचरतीतिवापरिवृणक्तुनः सासहस्रं
तेस्वाप्तवचनाभेषज्यानिमानस्त्वंपुत्रेषुपौत्रेषुचरीरिषस्तोकंतुद्यते

ध

६२ स्तनयंतनोतेरग्निरपिरुद्रउच्यतेतस्यैषाभवति॥७॥जराबोधतद्विवि
ड्ढिविशेविशेयज्ञियाय॥स्तोमंरुद्रायदृशीकम्॥जरास्तुतिर्जरतेस्तु
तिकर्मणस्तांबोधतयाबोधयितरितिवातद्विविड्ढितत्कुरुमनुष्यस्यम
नुष्यस्ययजनायस्तोमंरुद्रायदर्शनीयमिंद्रइरांदृणातीतिवेरांददा
तीतिवेरांदधातीतिवेरांदारयतइतिवेरांधारयतइतिवेंदवेद्रवतइ ६२

नो

तिवेंदौरमतइतिवेंधेभूतानीतिवातद्यदेनंप्राणैःसमैंधंतदिंद्रस्यें
द्रत्वमितिविज्ञायतइदंकरणादित्याग्रायणइदंदर्शनादित्यौपमन्यव य
इंदतेर्वै~~श्व~~श्वर्यकर्मणइंदंछत्रूणांदारयितावाद्रावयितावादरयिता
चयज्वनांतस्यैषाभवति॥८॥अदर्दरुत्समसृजोविखानित्वमर्णवा
न्बद्बधानाँअरम्णाः॥महांतमिंद्रपर्वतंवियद्वःसृजोविधाराअव।

रम्मा॥२

६३ दानवं हन्॥ अहन्नुत्समुत्स उत्सदनाद्वोत्स्यंदनाद्वोन्नयनाद्वा
व्यसृजोस्य खानि त्वमर्णवानर्णस्वत एतान्माध्यमिकांत्संस्त्या
यांश्चावबाधमानानैरम्णातिः संयमनकर्मा विसर्जनकर्मा वा म
धं २ हांतमिंद्र पर्वतं मेयद्ववृणोद्वजोस्य धारा अवाहन्नेनं दानकर्मा
णं तस्यैषापरा भवति॥ १॥ यो जात एव प्रथमो मनस्वांदेवो देवान्क्र ६३

तुना पर्यभूषत्॥ यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना
स जनास इंद्रः॥ यो जात एव प्रथमो मनस्वी देवो देवान्क्रतुना कर्मणा
पर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्रामदिति वा यस्य बलाद्द्यावापृ
थिव्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्त्वेन स जनास इं
द्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता पर्जन्यस्तृपेराद्यं

६५

तविपरीतस्यतर्पयिताजन्यः परोजेतावाजनयितावाप्रार्जयितावा
रसानांतस्यैषाभवति ॥१०॥ विवृक्षान्हंत्युतहंतिरक्षसोविश्वंबिभा
यभुवनंमहावधात् ॥ उतानागाईषतेवृष्ण्यावतोयत्पर्जन्यस्तनय
न्हंतिदुष्कृतः ॥ विहंतिवृक्षान्विहंतिचरक्षांसिसर्वाणिचास्माद्भू
तानिबिभ्यतिमहावधान्महान्ह्यस्यवधोप्यनपराधोभीतःपलायते

६४

वर्षकर्मवतोयत्पर्जन्यस्तनयन्हंतिदुष्कृतः पापकृतोबृहस्पतिर्बृह
तःपातावापालयितावातस्यैषाभवति ॥११॥ अश्नापिनद्धंमधुपर्य
पश्यन्मत्स्यंनदीनउदनिक्षियंतम् ॥ निष्टज्जभारचमसन्नवृक्षाद्बृ
हस्पतिर्विरवेणाविकृत्य ॥ अशनवतामेघेनापिनद्धंमधुपर्यपश्यन्म
त्स्यमिवदीनउदकेनिवसंतंनिर्जहारतच्चमसमिववृक्षाच्चमसःक

६५ स्माच्चमंसस्मिंनितिबृहस्पतिर्विरिवेणशब्देनविकृत्सब्रह्मणस्पति
र्ब्रह्मणःपातावापालयितावातस्यैषाभवति॥१२॥अश्मास्यमवतं
ब्रह्मणस्पतिर्मधुधारमभियमोजसातृणत्॥तमेवविश्वेपपिरेस्वर्दृशो
बहुसाकंसिसिचुरुत्समुद्रिणम्॥अश्नवंतमास्यंदनवंतमवाति
तंब्रह्मणस्पतिर्मधुधारमभियमोजसाबलेनाभ्यतृणत्तमेवसर्वेपिबं ६५

तिरश्मयःसूर्यदृशोबह्वेनंसहसिंचंत्युत्समुद्रिणमुदकवंतम्॥१३॥ ॥
चतुर्थस्यप्रथमःपादः॥ ॥क्षेत्रस्यपतिः॥क्षेत्रंक्षियतेर्निवासकर्मणस्त
स्यपातावापालयितावातस्यैषाभवति॥१॥क्षेत्रस्यपतिनावयंहि
तेनेवजयामसि॥गामश्वंपोषयित्न्वासनोमृळातीदृशे॥क्षेत्रस्यप
तिनावयंसुहितेनेवजयामोगामश्वंपुष्टंपोषयितृचाहरेति॥सनो

६६ मृळातीदृशो॥ बलेनबाधनेनवामृळतिरुपदयाकर्मापूजाकर्मावा
तस्यैषापराभवति॥ क्षेत्रस्यपतेमधुमंतमूर्मिंधेनुरिवपयोअस्मा
ते सुधुक्ष्व।मधुश्चुतंघृतमिवसुपूतमृतस्यनःपतयोमृळयंतु॥१॥क्षे
त्रस्यपतेमधुमंतमूर्मिंधेनुरिवपयोअस्मासुधुक्ष्वेतिमधुश्चुतंघृत
मिवोदकंसुपूतमृतस्यनःपातारोवापालयितारोवामृळयंतुमृळ ६६

त्तिदीनकर्मातद्यत्समान्यामृचिसमानाभिव्याहारंभवतितज्जामिभव
तीत्येकंमधुमंतंमधुश्चुतमितियथायदेवसमानेपादेसमानाभिव्या
हारंभवतितज्जामिभवतीत्यपरंहिरण्यरूपःसहिरण्यसंदृगितिय
था २ थायथाकथाचविशेषोजामिभवतीत्यपरंमंडूकाइवोदकान्मंडूकाउद
कादिवेतियथा॥ वास्तोष्पतिः॥ वास्तुर्वसतेर्निवासकर्मणस्तस्यपाता

६७

वापालयितावातस्यैषाभवति॥३॥अमीवहावास्तोष्पतेविश्वारूपा-
ण्याविशन्॥सखासुशेवएधिनः॥अभ्यमनहावास्तोष्पतेसर्वाणि
रूपाण्याविशंस्सखानःसुसुखोभवशेवइतिसुखनामशिष्यतेर्वका
रोनामकरणोंतस्थांतरोपलिंगीविभाषितगुणःशिवमित्यप्यस्यभव
तियद्यद्रूपंकामयतेतत्तद्देवताभवति॥रूपंरूपंमघवाबोभवीतीत्य

६७

पिनिगमोभवति॥वाचस्पतिर्वाचःपातावापालयितावातस्यैषाभवति
॥४॥पुनरेहिवाचस्पतेदेवेनमनसासह॥वसोष्पतेनिरामयमय्येवत
न्वं१मम॥इतिसानिगदव्याख्याताँनपात्तनूनप्त्राव्याख्यातस्यैषाभवति
॥५॥योअनिध्मोदीदयदप्स१ंतर्यंविप्रासईळतेअध्वरेषु॥अपांन
पान्मधुमतीरपोदायाभिरिंद्रोवावृधेवीर्याय॥योअनिध्मोदीप्यते-

पां

न्त

नि २

६८ भ्यंतरमसुयंमेधाविनस्तुवंतियज्ञेषुसोमपान्नपान्मधुमतीरपोदेस्य
भिषवाययाभिरिंद्रोवर्द्धतेवीर्यायवीरकर्मणेयमोयच्छतीतिसत
स्तस्यैषाभवति॥६॥परेयिवांसंप्रवतोमहीरनुबहुभ्यःपंथामनु
पस्पशानम्॥वैवस्वतंसंगमनंजनानांयमंराजानंहविषादुव
स्य॥परेयिवांसंपर्यागतवंतंप्रवतउद्वतोनिवतइत्यवतिर्गतिक ६८

र्माबहुभ्यःपंथामनुपस्पाशयमानंवैवस्वतंसंगमनंजनानांयमं
राजानंहविषादुवस्येतिदुवस्यतिराप्नोतिकर्माग्निरपियमउच्य
तेतमेताऋचोनुप्रवदंति॥७॥सेनेवसृष्टामंदधात्यस्तुर्नदिद्युत्त्वे
षप्रतीका॥यमोहजातोयमोजनित्वंजारःकनीनांपतिर्जनीना
म्॥तंवश्चराथावयंवसत्यास्तंनगावोनक्षंतइद्धं॥इतिद्विपदाःसे

नेवस्त्रष्टाभयंवाबलंवादधात्सस्तुरिवदिद्युत्वेषप्रतीकाभयप्रती
कामहप्रतीकादीप्तप्रतीकावा॥यमोहजातइंद्रेणसहसंगतः॥
यमाविहेहमातरेत्यपिनिगमोभवति॥यमइवजातोयमोजनिष्य
माणोजारःकनीनांअरयितापतिर्जनीनांपालयिताजा
यानांत्प्रधानाहियज्ञसंयोनभवंति॥तृतीयोग्निरिष्टे [redacted]
त गो१

पतिरित्यपिनिगमोभवति॥तंवश्वराथाचरंत्यापश्चाकृत्यावसत्या
चनिवसंत्योषधाकृत्यास्तंयथागावश्चाप्नुवंतितथाप्नुयामेद्वंसम
द्वंभोगैर्मित्रःप्रमीयतेस्त्रायतेःसंमिन्वानोद्रवतीतिवामेदयतेर्वात
स्यैषाभवति॥८॥मित्रोजनान्यातयतिब्रुवाणोमित्रोदाधारपृथि
वीमुतद्याम्॥मित्रःकृष्टीरनिमिषाभिचष्टेमित्रायहव्यंघृतवज्जुहु

७० होत॥मित्रोजनानायातयतिप्रब्रुवाणःशब्दंकुर्वन्मित्रएवधारयतिपृ
थिवींचद्दिवंचमित्रःकृष्टीरनिमिषन्नभिविपश्यतीतिकृष्टयइतिम
नुष्यनामकर्मवंतोभवंतिविकृष्टदेहावामित्रायहव्यंघृतवज्जुहोते
ख्या तिव्याॅतंजुहोतिर्दानकर्माकःकमनोवाक्रमणोवासुखोवातस्यैषाभ
वति॥९॥हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत्। ७०

सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥हिरण्यगर्भो
हिरण्यमयोगर्भोहिरण्यमयोगर्भोस्येतिवागर्भोगृभेर्गृणात्यर्थेगिर
त्यनर्थानितिवायदाहिस्त्रीगुणान्गृह्णातिगुणाश्चास्यागृह्यंतेथग
र्भोभवतिसमभवदग्रेभूतस्यजातःपतिरेकोबभूववसुधारयतिपृथि
वींचदिवंचकस्मैदेवायहविषाविधेमेतितिव्याख्यातंविधतिर्दान

७१ कर्मासरस्वान्व्याख्यातस्तस्यैषाभवति॥१०॥येतेसरस्वऊर्मयोमधु
मंतोघृतश्चुतः॥तेभिर्नोविताभव॥इतिसानिगदव्यांता॥११॥द्वितीयः ख्या
पादः॥ ॥विश्वकर्मासर्वस्यकर्तातस्यैषाभवति॥१॥विश्वकर्माविम
नाआद्विहायाधाताविधातापरमोतसंदृक्॥तेषामिष्टानिसमिषा
मदंतियत्रासप्तऋषीन्परएकमाहुः॥विश्वकर्माविभूतमनाव्या ७१

प्ताधाताचविधाताचपरमश्चसंद्रष्टाभूतानांतेषामिष्टानिवाकांतानि
वाक्रांतानिवागतानिवामतानिवानतानिवाद्भिःसहसंमोदंतेयत्रैता
निसप्तऋषीणानिज्योतींषितेभ्यःपरआदित्यस्तान्येतस्मिन्नेकंभवंती
त्यधिदैवतमथाध्यात्मंविश्वकर्माविभूतमनाव्याप्ताधाताचविधाताच
परमश्चसंदर्शयितेंद्रियाणामेषामिष्टानिवाकांतानिवाक्रांतानिवाग

७२ तानिवामतानिवा।नतानिवाअनेनसहसंमोदंतेयत्रेमानिसप्तऋषीणा।
नीद्रियाण्येभ्यःपरआत्मातान्यस्मिन्नेकंभवंतीत्यात्मगतिमाचष्टेतत्रे।
तिहासमाचक्षतेविश्वकर्माभौवनःसर्वमेधेसर्वाणिभूतानिजुहवां
चकारसआत्मानमप्यंततोजुहवांचकारतदभिवादिन्येषर्ग्भवति॥
यइमाविश्वाभुवनानिजुह्वदितितस्योत्तराभूयसेनिर्वचनाय॥२॥ ७२

विश्वकर्मन्हविषावावृधानःस्वयंयजस्वपृथिवीमुतद्याम्॥मुह्यंत्वन्ये
अभितोजनासइहास्माकंमघवासूरिरस्तु॥विश्वकर्मन्हविषावर्द्धय
मानःस्वयंयजस्वपृथिवीचदिवंचमुह्यंत्वन्येअभितोजनासःसपत्ना
इहास्माकंमघवासूरिरस्तुप्रज्ञातातार्क्ष्यस्त्वष्टाव्याख्यातस्तीर्णेअंत
रिक्षेक्षियतितूर्णमर्थंरक्षत्यश्नोतेर्वातस्यैषाभवति॥३॥त्यमूषुवाजि

७२ नं देवजूतं सहावानं तरुतारं रथानाम् ॥ अरिष्टनेमिं पृतनाजमाशुं स्व
स्तये तारक्ष्यमिहा हुवेम ॥ तमभृशमन्नवंतं जूतिर्गतिः प्रीतिर्वा देवजूतं
देवगतं देवःप्रीतं वा सहस्वंतं तारयितारं रथानामरिष्टनेमिं पृतनाजित २
माशुं स्वस्तये तार्क्ष्यमिह ह्वयेमेति कमन्यं मध्यमादेवमवक्ष्यत्तस्यैषाप
रा भवति ॥ ८ ॥ सद्यःश्चिद्यः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्त ७२

तान ॥ सहस्रसाः शतसा अस्य रंहिर्न स्मा वरंते युवतिं न शर्यां ॥ सद्यो
पि यः शवसा बलेन तनोत्यपः सूर्य इव ज्योतिषा पंच मनुष्यजातानि स
हस्रसानिनी शतसानिन्यस्य सा गतिर्न स्मैनां वारयंति प्रयुवतीमिव श
रमयीमिषुं मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वा मस्तुंत्यस्मादिव ष
स्तस्यैषा भवति ॥ ९ ॥ त्वया मन्यो सरथमारुजंतो हर्षमाणासो धृषिता म

रुत्वः॥ तिग्मेषव आयुधा संशिशाना अभि प्रयंतु नरो अग्निरूपाः॥ त्वया म
न्यो सरथमारुह्य रुजंतो हर्षमाणासो धृषिता मरुत्वस्तिग्मेषव आयुधा पि
णा नि संशिश्यमाना अभिप्रयंतु नरो अग्निरूपा अग्निकर्माणः संनद्धाः क
वचिन इति वा दधिक्रा व्याख्यातस्तस्यैषा भवति॥ ९॥ आ दधिक्राः श
वसा पंच कृष्टीः सूर्य इव ज्योतिषापस्ततान॥ सहस्रसाः शतसा वाज्य

र्वा पृणक्तु मध्वा समिमा वचांसि॥ आतनोति दधिक्रा बलेनापः सूर्य इव
ज्योतिषा पंच मनुष्यजातानि सहस्रसाः शतसा वाजी वेजनवानर्वेरणवा २
न्संपृणक्तु नो मधुनोदकेन वचनानीमानीति मधु धमतेर्विपरीतस्य सवि
ता सर्वस्य प्रसविता तस्यैषा भवति॥ १०॥ सविता यंत्रैः पृथिवीमरम्णा
दस्कंभने सविता द्यामदृंहत्॥ अश्वमिवाधुक्षद्धुनिमंतरिक्षमतूर्ते बद्धं तूर्ते

७५

सवितासमुद्रम्॥ सवितायंत्रैः पृथिवीमरमयदनालंबनेंतरिक्षेसविता
द्यामदृंहदश्वमिवाधुक्षद्धुनिमंतरिक्षेमेघंबद्धमतूर्तेबद्धमतूर्णइ
तिवात्वरमाणइतिवासवितासमुदितारमितिकमंन्यमादित्यादेवम
वक्ष्यदादित्योपिसवितोच्यतेतथाचहैरण्यस्तूपेस्तुतोर्चन्हिरण्य
स्तूपऋषिरिदंसूक्तंप्रोवाचतदभिवादिन्येषर्ग्भवति॥८॥हिरण्य

७५

स्तूपः सवितर्यथात्वांगिरसोजुह्वेवाजेअस्मिन्॥ एवात्वार्चन्नवसे
वंदमानः सोमस्येवांशुंप्रतिजागराहम्॥ हिरण्यस्तूपोहिरण्यमय
स्तूपोहिरण्मयस्तूपोस्येतिवास्तूपस्त्यायतेः संघातः सवितर्यथा
त्वांगिरसोजुह्वेवाजेअन्नेअस्मिन्नेवंत्वार्चन्नवनायवंदमानः सो
मस्येवांशुंप्रतिजागर्म्यहंत्वष्टाव्याख्यातस्तस्यैषाभवति॥९॥दे

वस्त्वष्टासविताविश्वरूपःपुपोषप्रजाःपुरुधाजजान ॥ इमाचवि-
श्वाभुवनान्यस्यमहद्देवानाममसुरत्वमेकम् ॥ देवस्त्वष्टासविता
सर्वरूपःपोषतिप्रजारसानुप्रदानेनचैवबहुधाचेमांजनयतीमा
निचसर्वाणिभूतान्युदकान्यस्यमहच्चास्मैदेवानामसुत्वमेक- २२
त्वंप्रज्ञावत्वंवानवत्वंवापिवासुरितिप्रज्ञानमास्यस्यनर्थानस्ताश्चा

॥ प्रण आयूंषितारिषत् । वातआवातुभेषज्यानिशंभु
मयोभुवनोहृदे २

स्यामनर्थाअसुरत्वमादिलुप्तंवातोवातीतिसतस्तस्यैषाभवति ॥ १०
॥ वातआवातुभेषजंनिशंभुमयोभुर्वनोहृदेप्यायप्रवर्द्धयचनआ
युरग्निर्व्याख्यातस्तस्यैषाभवति ॥ ११ ॥ प्रतित्यंचारुमध्वरंगोपीथा
यप्रहूयसे ॥ मरुद्भिरग्नआगहि ॥ तंप्रतिचारुमध्वरंसोमपानाय
प्रहूयसेसोग्नेमरुद्भिःसहागच्छेतिकमन्यंमध्यमादेवमवक्ष्यत्तस्ये

षापराभवति॥१२॥अभित्वापूर्वपीतयेसृजामिसोम्यंमधु॥मरुद्भि
रग्नआगहि॥अभिसृजामित्वापूर्वपीतयेपूर्वपानायसोम्यंमधुसो
ममयंसोग्नेमरुद्भिःसहागच्छेति॥१३॥ ॥तृतीयःपादः॥ ॥वेनोवे
नतेःकांतिकर्मणस्तस्यैषाभवति॥१॥अयंवेनश्चोदयत्पृश्निग
र्भाज्योतिर्जरायूरजसोविमाने॥इममपांसंगमेसूर्यस्यशिशुंनवि

प्रामतिभीरिहंति॥अयंवेनश्चोदयत्पृश्निगर्भाःप्राष्टवर्णागर्भाआपइति
वाज्योतिर्जरायुर्ज्योतिरस्यजरायुस्थानीयंभवतिजरायुर्जरयागर्भस्य
जरयायूयतइतिवेममपांचसंगमनेसूर्यस्यचशिशुमिवविप्रामतिभीरि
हंतिरिहंतिलिहंतिवर्द्धयंतिपूजयंतीतिवाशिशुःशंसनीयोभवतिशिशी
तेर्वास्याद्दानकर्मणश्चिरलब्धोगर्भइत्यसुनीतिरसून्नयतितस्यैषा॥

भवति॥२॥असुनीतेमनोअस्मासुधारयजीवातवेसुप्रतिरानआयुः॥
रारंधिनःसूर्यस्यसंदृशिघृतेनत्वंतन्वंवर्द्धयस्व॥असुनीतेमनोअस्मा
सुधारयचिरंजीवनायप्रवर्द्धयचनआयूरंधयचनःसूर्यस्यसंदर्शनाय
रध्यतिर्वशगमनेपिदृश्यते॥मारध्यामद्विषतेसोमराजंनित्यपिनिगमो
भवति॥घृतेनत्वमात्मानंतन्वंवर्द्धयस्वेतिव्याख्यातस्तस्यैषाभवति॥३॥

सतस्यहिशुरुधःसंतिपूर्वीःसतस्यधीतिर्वृजिनानिहंति॥सतस्यश्लोको
बधिरात्ततर्द्दकर्णाबुधानःशुचमानआयोः॥सतस्यहिशुरुधःसंतिपूर्वीः
सतस्यप्रज्ञावर्जनीयानिहंतिसतस्यश्लोकोबधिरस्यापिकर्णावातृणत्तिव
द्धिरोबधश्रोत्रःकर्णौबोधयन्वीप्यमानआयनस्यमनुष्यस्यज्योतिषोवोद मा
कस्यवेंदुरिंधेरुनत्तेर्वातस्यैषाभवति॥४॥प्रतद्वोचेयंभव्यायेंदवेहव्यो

दी२ स्य२

७८ नयदुषवान्मन्मरेजतिरक्षोहामन्मरेजति॥स्वयंसोअस्मदानिदोवधैर
जेतदुर्मतिं॥अवस्रवेदघशंसोवतरमवक्षुद्रमिवस्रवेत्॥प्रब्रवीमित
द्यायेंद्रवेहवनार्हइवयइषवानन्नवान्कामवान्वामननानिचनोरे
जयतिस्वयंसोअस्मद्भिनिंदितारं॥वधैरजेतदुर्मतिम्॥अवस्र
वेदघशंसः॥ततश्चावतरंक्षुद्रमिवावस्रवेदभ्यासेभूयांसमर्थंम ७८
२ क्षोहा नबलेनरेजयति २

न्यंतेयथाहोदर्शनीयाहोदर्शनीयेतितत्परुच्छेपस्यशीलंपरुच्छेपऋषिः २ स
परुषिपरुषिशेषोस्येतिवेतीमानिसप्तविंशतिर्देवतानामधेयान्य
नुक्रांतानिसूक्तभांजिहविर्भांजितेषामेतान्यहविर्भांजिवेनोसुनीति
र्ऋतइंदुःप्रजापतिःप्रजानांपातावापालयितावातस्यैषाभवति॥५॥
प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरितावभूव॥यत्कामास्तेजु

८०

कुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्॥ प्रजापते न हि त्वदेतान्यन्यः
सर्वाणि जातानि परितानि बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्या
मपत्यो रयीणामित्याशीरहिर्व्याख्यातस्तस्यैषा भवति॥ ३६॥ अब्जामु ज्ञा
क्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन्॥ अप्सुजामुक्थैरहिं गृणी
षे बुध्नें दीनां रजःसु षीदन् बुध्नमंतरिक्षं बुध्ना अस्मिं धृता आप इती ८०
ने

दमपीतरद्बुध्नमेतस्मादेव बुध्ना अस्मिं धृताः प्राणा इति योहिः स बु
ध्न्यो बुध्नमंतरिक्षं तंनिवासात्तस्यैषा भवति॥ ३७॥ मा नोहिर्बुध्न्यो रिषे
धान्मा यज्ञो अस्य स्त्रिधदृतायोः॥ मा च नोहिर्बुध्न्यो रेषणाय धान्मा
स्य यज्ञोरवाच स्त्रिधद्यज्ञकामस्य सुपर्णो व्याख्यातस्तस्यैषा भव
ति॥ ३८॥ एकं सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं विचष्टे॥

८।

तंपाकेनमनसापश्यमंतितस्तंमातारेल्हिसउरेल्हिमातरम् ॥ एकः
सुपर्णःससमुद्रमाविशतिसइमानिसर्वाणिभूतान्यभिविपश्यतितंपा
केनमनसापश्यमंतितइत्यृषेर्दृष्टार्थस्यप्रीतिर्भवत्याख्यानसंयुक्ता
तंमातारेल्हिवागेषामाध्यमिकासउमातरंरेल्हिपुरूरवाबहुधारो
रूयतेतस्यैषाभवति ॥ ९ ॥ समस्मिंजायमानआसतग्नाउतेमव

ना

८१

वैवललाल

र्द्धन्नद्यःस्वगूर्त्ताः ॥ महेयत्त्वापुरूरवोरणायावर्द्धयंदस्युहत्यायदेवाः ॥ समा
सतास्मिंजायमानेग्नागमनादापोदेवपत्न्योवाप्यैनमवर्द्धयंनद्यःस्वयं
गामिन्योमहतेचयत्त्वापुरूरवोरणायरमणीयायसंग्रामायावर्द्धयंदस्युहत्या
यचदेवादेवाः ॥ १० ॥ ॥ इतिचतुर्थोऽध्यायःसमाप्तः ॥ ४ ॥ श्येनोव्याख्या
तस्तस्यैषाभवति ॥ १ ॥ आदायश्येनोअभरत्सोमंसहस्रंसवाँअयुतंचसा

प२

नो

कंम्॥अत्रापुरंधिरजहादरातीर्मदेसोमस्यमूरा अमूरः॥आदायश्यैहर
सोमंसहस्रंसवान्युतंचसहस्रहस्रंसहस्रंसाव्यमभिप्रेसतत्रायुतंसो
मभक्षास्तत्संबंधेनायुतंदक्षिणा॥इतिवातत्रपुरंधिरजहादमित्रांन्मादोना
नीतिवा॥मदेसोमस्यमूराअमूरः॥ऐंद्रेचसत्त्वेसोमपानेनवसतुतस्मादिंद्रं त्त
मन्यंतनुषधिःसोमःसुनोतेर्यदेनमभिषुण्वंतिबहुलमस्यनैघंटुकंवृत्त

माश्चर्यमिवप्रधान्येनतस्यपावमानीषुनिदर्शनायोदाहरिष्यामः॥१॥
स्वादिष्ठयामदिष्ठयापवस्वसोमधारया॥इंद्रायपातवेसुतः॥इतिसा
निगद्व्याख्यानायैषापराभवतिचंद्रमसोवैतस्यवा॥२॥सोमंमन्य
तेपपिवान्यत्संपिंषंत्योषधिं॥सोमंयंब्रह्माणोविदुर्नतस्याश्नातिक
श्चन॥सोमंमन्यतेपपिवान्यत्संपिषंत्योषधिमितिवृथासुतमसोम

८३

माह सोमंयंब्रह्माणोविदुरितिनतस्याश्नातिकश्चनायज्वेत्यधियज्ञमथा
धिदैवतंसोमंमन्यतेपपिवान्यत्संपिंशंत्योषधिमितियजुःसुतमसोममा
ह सोमंयंब्रह्माणोविदुश्चंद्रमसंनतस्याश्नातिकश्चनादेवइत्यथैषाप
राभवतिचंद्रमसोवैतस्यवा॥ ४॥ यत्वादेवप्रपिबंतितततआप्यायसे
पुनः॥ वायुःसोमस्यरक्षितासमानांमास आकृतिः॥ यत्वादेवप्रपिबं

८३

तितत आप्यायसेपुनरितिनाराशंसानभिप्रेत्यपूर्वपक्षापरपक्षावितिवा
वायुःसोमस्यरक्षितावायुमस्यरक्षितारमाहसाहचर्याद्रसहरणाद्वास
मानांसंवत्सराणांमास आकृतिःसोमोरूपविशेषैरोषधिश्चंद्रमावाचंद्र
माश्चांद्रमितिचंद्रोमाताचांद्रंमानमस्येतिवाचंद्रंचंदतेःकांतिकर्मणः
श्चंदनमित्यप्यस्यभवतिचारुद्रमैतिचिरंद्रमैतिचमेर्वापूर्वंचारुरुचे

८४ र्विपरीतस्तुतस्यैषाभवति ॥५॥ नवोनवोभवतिजायमानोह्नांकेतु
रुषसामेत्यग्रम्॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतेदी
र्घमायुः॥ नवोनवोभवतिजायमानइतिपूर्वपक्षादिमभिप्रेत्याह्ना
केतुरुषसामेत्यग्रमित्यपरपक्षांतमभिप्रेत्यादित्यदैवतोद्वितीयः
पादइत्येकेभागंदेवेभ्योविदधात्यायन्नित्यर्द्धमासेज्यामभिप्रे ८४

त्य२

त्यप्रवर्द्धयतेचंद्रमादीर्घमायुर्मृत्युर्मारयतीतिसतोमृतंच्यावय
तीतिशतबलाक्षोमौद्गल्यस्तस्यैषाभवति॥६॥ परंमृत्योअनुप
रेहिपंथांयस्तेस्वइतरोदेवयानात्॥ चक्षुष्मतेशृण्वतेतेब्रवीमि
मानःप्रजांरीरिषोमोतवीरान्॥ परंमृत्योध्रुवंमृत्योध्रुवंपरेहि
मृत्योकथितंतेनमृत्योमृतंच्यावयतेभवतिमृत्यौमदेवीमुदेवी

८५

तेषामेषाभवति॥७॥त्वेषमित्थासमरणंशिमीवतोरिंद्राविष्णूसुत
पावामुरुष्यति॥यामर्त्यायप्रतिधीयमानमित्कृशानोरस्तुरसनामु २२
रुष्यथः॥इतिसानिगदव्याख्याता॥विश्वानरोव्याख्यातस्तस्यैषाभ
वति॥८॥प्रवोमहेमंदमानायांधसोर्चाविश्वानरायविश्वाभुवे॥इं
द्रस्ययस्यसुमस्वंसहोमहिश्रवोनृम्णंचरोदसीसपर्यतः॥प्रार्चतस्तु ८५
खं

तिंमहतेंधसोन्नस्यदात्रेमंदमानायमोदमानायस्तूयमानायशब्दाय
मानायेतिवाविश्वानरायसर्वंविभृतायेंद्रस्यप्रीतौसुमहद्बलंमह प स्य २
च्चश्रवणीयंयशोनृम्णंचबलंनृन्नतंद्यावापृथिवीवःपरिचरतइ
तिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति॥९॥उदुज्योतिरमृ
तंविश्वजन्यंविश्वानरःसवितादेवोअश्रेत्॥उदशिश्रियज्ज्योतिरमृ

न्यं

॥८६॥ तंसर्वजन्नंविश्वानरःसविताद्देवइतिधातासर्वस्यविधातातस्यैषाभ
वति॥१०॥धाताददातुदाशुषेप्राचींजीवातुमक्षितिम्॥वयंदेवस्यधी
महिसुमतिंसत्यधर्मणः॥धाताददातुदत्तवतेप्रजांजीविकामनुप
क्षीणांवयंदेवस्यधीमहिकल्याणींमतिंसुमतिंसत्यधर्मणोविधाता
धात्राव्याख्यातस्तस्यैषनिपातोभवतिबह्वृग्देवतायामृचि॥११॥सो ॥८६॥

मस्यराज्ञोवरुणस्यधर्मणिबृहस्पतेरनुमत्याउशर्मणितवाहमद्यम मः
घवंनुपस्तुतौधातर्विधातःकलशाँअभक्षयम्॥इत्येताभिर्देवता
भिरभिप्रसूतःसोमकलशानभक्षयमितिकलशःकलाअस्मिंछे
रतेमात्राःकलिश्चकलाश्चकिरतेर्विकीर्णमात्राः॥१२॥प्रथमःपा
दः॥ ॥अथातोमध्यस्थानादेवतागणास्तेषांमरुतःप्रथमागामि

नी.२

८१ नोभवंतिमरुतोमितराविणोवामितरोचिनोवामहद्द्रवंतीतिवाते
षामेषाभवति॥१॥आविद्युन्मद्भिर्मरुतःस्वर्कैरथेभिर्यातऋष्टि
मद्भिरश्वपर्णैः॥आवर्षिष्ठयानइषावयोनपप्ततासुमायाः॥विद्यु
न्मद्भिर्मरुतस्स्वर्कैःस्वंचनैरितिवास्वर्चनैरितिवास्वर्चिर्भिरितिवार
थैरायातऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेनचनोन्नेनवयइवा ८१

पततसुमायाःकल्याणकर्माणोवाकल्याणप्रज्ञावारुद्राव्याख्यातास्तेषामेषा
भवति॥२॥आरुद्रासइंद्रावंतःसजोषसोहिरण्यरथाःसुवितायगंतन॥
इयंवोअस्मत्प्रतिहर्यतेमतिस्तृष्णजेनदिवउत्साउदन्यवे॥आगच्छतरुद्रा
इंद्रेणसहजोषणाःसुवितायकर्मणइयंवोअस्मदपिप्रतिकामयतेमतिस्तृ
ष्णजइवदिवउत्साउदन्यवेइतितृष्णक्तृष्यतेरुदन्युरुदन्यतेर्भवउ

८८ ऋ भांतीतिऋत्तेनभांतीतिऋत्तेनभवंतीतिवातेषामेषाभवति॥ ऋ॥ विष्ट्वीशमी
तरणित्वेनवाघतोमर्त्तासःसंतोअमृतत्वमानशुः॥ सौधन्वनाऋभवःसूर २
चक्षसःसंवत्सरेसमपृच्यंतधीतिभिः॥ कृत्वाकर्माणिक्षिप्रत्वेनवोल्हारोमे
धाविनोवामर्त्तासःसंतोअमृतत्वमानशिरेसौधन्वनाऋभवःसूरख्याना
वासूरप्रज्ञावासंवत्सरेसमपृच्यंतकर्मभिःऋभुर्विभ्वावाजइतिसुधन्वन ८८

आंगिरसस्यत्रयःपुत्राबभूवुस्तेषांप्रथमोत्तमाभ्यांबहुवंनिगमाभवंतिनमध्य न१
मेनतदेतदृभोश्चबहुवचनेनचमसस्यचसंस्तवेनबहूनिदशतयीषु
सूक्तानिभवंत्यादित्यरश्मयोप्यृभवउच्यंते। अगोह्यस्ययदसस्तनागृहेत
दद्येदमृभवोनानुगच्छथ॥ अगोह्यआदित्योगूहनीयस्तस्ययदस्वप
थगृहेयावत्तत्रभवथनतावदिहभवथेस्यंगिरसोव्याख्यातास्तेषामेषा

स
भवति॥४॥ विरूपा इदृषयस्त इद्गंभीरवेपसः॥ ते अंगिरसः सूनवस्ते अ
ग्नेः परिजज्ञिरे॥ बहुरूपास्त ऋषयस्ते गंभीरकर्माणो वा गंभीरप्रज्ञा वा ते अं
गिरसः पुत्रास्ते अग्नेरधिजज्ञिर इत्यग्निजन्म पितरो व्याख्यातास्तेषामेषा
भवति॥५॥ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः॥ असुं
य ईयुरवृका ऋतज्ञास्ते नोऽवंतु पितरो हवेषु॥ उदीरतामवर उदीरतां प

र उदीरतां मध्यमाः पितरः सोम्याः सोमसंपादिनस्ते असुं ये प्राणमन्वी
युरवृका अनमित्राः सत्यज्ञा वा यज्ञज्ञा वा ते न आगच्छंतु पितरो ह्वानेषु
माध्यमको यम इत्याहुस्तस्मान्माध्यमकान्पितॄन्मन्यंते अंगिरसो
व्याख्याताः पितरो व्याख्याता भृगवो व्याख्याता अथर्वाणोऽथनवंतस्थर्वति भ२
श्चरतिकर्मा तत्प्रतिषेधस्तेषामेषा साधारणा भवति॥६॥ अंगिरसो नः

पितरोनवग्वाअथर्वाणोभृगवःसोम्यासः।।तेषांवयंसुमतौयज्ञियाना
मपिभद्रेसौमनसेस्याम।।अंगिरसोनःपितरोनवगतयोनवनीतगत
योवाथर्वाणोभृगवःसोम्याःसोमसंपादिनस्तेषांवयंकल्याण्यांमतौ
सुमतौयज्ञियानामपिचैषांभद्रेभंदनीयेभाजनवतिवाकल्याणेमन
सिस्यामेतिमाध्यमकोदेवगणइतिनैरुक्ताःपितरइत्याख्यानमथा

ऋषयस्तूयंते।।७।।सूर्यस्येववक्षथोज्योतिरेषांसमुद्रस्येवमहिमागभी
रः।वातस्येवप्रजवोनान्येनस्तोमोवसिष्ठाअन्वेतवेवः।इतियथाआ।
प्त्याआप्नोतेस्तेषामेषनिपातोभवत्यैंद्र्यामृचि।।८।।स्तुषेय्यंपुरुवर्पस
मृभ्वमिनतममाप्त्यमाप्त्यानाम्।आदर्षतिशवसासप्तदानून्प्रसाक्ष
तेप्रतिमानानिभूरि।।स्तोतव्यंबहुरूपमुरुभूतमीश्वरतममाप्तमा

ना

॥९१॥ सबाधोमादत्यातियःशवसाबलेनसमदाहनितिवासमदानवानितिवाप्र
साक्षतेप्रतिमानानिबहूनिसाक्षतिराप्नोतिकर्मा॥९॥ ॥द्वितीयःपादः
॥अथातोमध्यस्थानास्त्रियःस्तासामदितिःप्रथमागामिनीभवत्यदि
तिर्व्याख्यातातस्याएषाभवति॥१॥ दक्षस्यवादितेजन्मनिव्रतेराजानामि
त्रावरुणाविवाससि॥ अतूर्तपंथाःपुरुरथोअर्यमासप्तहोताविषु ॥९१॥

रूपेषुजन्मसु॥ दक्षस्यवादितेजन्मनिकर्मणिव्रतेराजानौमित्रावरु
णोपरिचरसिविवासतिःपरिचर्यायांहविष्मां॥आविवासतीत्याशास्ते
वीतर्त्तपंथाऽत्वरमाणपंथाबहुरथोअर्यमादित्योऽरीन्नियच्छतीतिसप्तहो
तासप्तास्मैरश्मयोरसानभिसंनामयंतिसप्तैनमृषयस्तुवंतीतिवावि
षमरूपेषुजन्मसुकर्मस्वुदयेष्वादित्योदक्षइत्याहुरादित्यमध्येच

न२

९२ स्तुतोदितिर्दाक्षायणी॥अदितेर्दक्षो अजायत दक्षाद्वदितिः परीति
च॥तत्कथमुपपद्येत समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरे
ति तरजन्मानौ स्यातामितरेतरप्रकृती अग्निरप्यादिरुच्यते तस्येषा भव ति
ति॥२॥यस्मै त्वं सुद्रविणो ददाशो नागास्त्वमदिते सर्वताता॥यं भद्रे
ण शवसा चोदयासि प्रजावता राधसा ते स्याम॥यस्मै त्वं सुद्रविणो ९२

श्री॰२

ददाशो नागास्त्वमदिते सर्वताता॥यं भद्रेण शवसा चोदयासि प्रजाव
ता राधसा ते स्याम॥यस्मै त्वं सुद्रविणो ददाशो नागास्त्वमनपराधित्वम
दिते सर्वासु कर्मतततिष्वागश्चाङ्पूर्वाद्गमेरेन एतेः किल्बिषं किल्भिदं
सुकृतकर्मणो भयं कीर्तिमस्य भिनत्तीति वा यं भद्रेण शवसा बलेन चो
दयसि प्रजावता राधसा ते वयमिह स्यामेति सरमा सरणात्तस्या एषा

च

सी

॥९३॥ भवति॥३॥किमिछंतीसरमाप्रेदमानट्‌दूरेह्यध्वाजगुरिःपराचैः
॥कास्मेहितिःकापरितक्म्यासीत्कथंरसायाअतरःपयांसि॥किमिछं
तीसरमेदंप्रापट्‌दूरेह्यध्वाजगुरिर्जंघम्यतेःपरांचनैरचितःकाते
स्मास्वर्थहितिरासीत्किंपरितकनंपरितक्म्यारात्रिःपरितएनांतक्म
तक्मेत्युष्णनामतकतइतिसतःकथंरसायाअतरःपयांसीतिरसा ॥९३॥

नदीरसतेःशब्दकर्मणःकथंरसानितान्युदकानीतिवादेवशुनींद्रेणप्र
हितापणिभिरसुरैःसमूदइत्याख्यानंसरस्वतीव्याख्यातातस्याएषा
भवति॥४॥पावकानःसरस्वतीवाजेभिर्वाजिनीवती॥यज्ञंवष्टुधिया
वसुः॥पावकानःसरस्वत्यन्नैरन्नवतीयज्ञंवष्टुधियावसुःकर्मवसु
स्तस्याएषापराभवति॥५॥महोअर्णःसरस्वतीप्रचेतयतिकेतुना॥

या

९४ धियोविश्वाविराजति॥महदर्णःसरस्वतीप्रचेतयतिप्रज्ञापयतिकेतु-
नाकर्मणाप्रज्ञयावेमानिचसर्वाणिभूतान्यभिविराजतिवागर्थेषुवि-
धीयतेतस्मान्माध्यमिकांवाचंमन्यंतेवाग्व्याख्यातातस्याएषाभव-
ति॥दी॥यद्वाग्वदंत्यविचेतनानिराष्ट्रीदेवानांनिषसादमंद्रा॥चत-
स्रऊर्जंदुदुहेपयांसिक्वस्विदस्याःपरमंजगाम॥यद्वाग्वदंत्यविचे ९४

तनान्यविज्ञातानिराष्ट्रीदेवानांनिषसादमदनाचतस्रोनुदिश-
ऊर्जंदुदुहेपयांसिक्वस्विदस्याःपरमंजगामेतियत्पृथिवींगच्छती-
तिवायदादित्यरश्मयोहरंतीतिवातस्याएषापराभवति॥आ।देवींवा
पं२ चमजनंतदेवास्तांविश्वरूपाःपशवोवदंति॥सानोमंद्रेषमूर्जंदुहा-
नाधेनुर्वागस्मानुपसुष्टुतैतु॥देवींवाचमजनयंतदेवास्तांसर्वरू

पाःपशवोवदंतिव्यक्तवाचश्चाव्यक्तवाचश्चसानोमनेमानंचरसंचदु
हानाधेनुर्वागस्मानुपेतुसुष्टुतानुमतीराकेतिदेवपत्न्यावितिनैरुक्ताःपौ
र्णमास्यावितियाज्ञिकायापूर्वापौर्णमासीसानुमतिर्योत्तरासाराकेति
विज्ञायतेनुमतिरनुमननात्तस्याएषाभवति॥८॥अन्विदनुमतेत्वंम
न्यासैशंचनस्कृधि॥क्रत्वेदक्षायनोहिनुप्रणआयूंषितारिषः॥

अनुमन्यस्वानुमतेत्वंसुखंचनःकुर्वन्नंचनोपत्यायधेहिप्रवर्धयचन
आयूराकारातेर्दानकर्मणस्तस्याएषाभवति॥९॥राकामहंसुहवांसु
ष्टुतीहुवेशृणोतुनःसुभगाबोधतुत्मना॥सीव्यत्वपःसूच्याच्छिद्यमानया
ददातुवीरंशतदायमुक्थ्यं॥राकामहंसुहवानांसुष्टुत्याह्वयेशृणोतुनः
सुभगाबोधत्वात्मनासीव्यत्वपःप्रजननकर्मसूच्याच्छिद्यमानयासूचीसी

९६

व्यतेर्ददातुवीरंशतप्रदमुक्थ्यंवक्तव्यप्रशंसंसिनीवालीकुहूरितिदेवप
त्न्याविितिनैरुक्ताअमावास्याइतियाज्ञिकायापूर्वामावास्यासासिनीवा
सा लीयोत्तरासाकुहूरितिविज्ञायतेसिनीवालीसिनमन्नंभवतिसिनातिभू
तानिवालंपर्ववृणोतेस्तस्मिन्नन्नवतीवालिनीवावालेनैवास्यामणुत्वा
चंद्रमासेवितव्योभवतीतिवातस्याएषाभवति॥१०॥सिनीवालिपृथुष्टुके ९६

ड्ढि
यादेवानामसिस्वसा॥जुषस्वहव्यमाहुतंप्रजांदेविदिदिद्धिनः॥सि
नीवालिपृथुजघनेस्तुकस्त्यायतेःसंघातःपृथुकेशस्तुकापृथुष्टुतिर्वाया
देवानामसिस्वसास्वसासुअसास्वेषुसीदतीतिवाजुषस्वहव्यमाहुतंप्र
च जांदेविदिशनःकुहूर्गूहतेःक्वाभूदितिवाक्वसतीहूयतइतिवाक्वाहु
तंहविर्जुहोतीतिवातस्याएषाभवति॥११॥कुहूमहंसुकृतंविद्मनाप

दि२

५१ समस्मिन्यज्ञेसुहवांजोहवीमि॥सानोददातुश्रवणंपितॄणांतस्यैतेदेविह
विषाविधेम॥कुहूमहंसुकृतंविदितकर्माणमस्मिन्यज्ञेसुह्वानामाह्व
येसानोददातुश्रवणंपितॄणांपित्र्यंधनमितिवापित्र्यंयशमितिवातस्यैतेदे ९३
विहविषाविधेमेतिव्याख्यातंयमीव्याख्याता।तस्याएषाभवति॥१२॥अन्य
मूषुत्वंयम्यन्यउत्वांपरिष्वजातेलिबुजेववृक्षं॥तस्यवात्वंमनइच्छासवा ५६
खं

तवाधाकृणुष्वसंविदंसुभद्रां॥अन्यमेवहित्वंयम्यन्यस्त्वांपरिष्वंक्ष्यते
लिबुजेववृक्षंतस्यवात्वंमनइच्छसवातवाधानेनकुरुष्वसंविदंसुभद्रां
कल्याणभद्रांयमीयमंचकमेतांप्रत्याचचक्षेत्याख्यानम्॥१३॥×॥तृती ९
यःपादः॥६॥ ॥उर्वशीव्याख्याता।तस्याएषाभवति॥१॥विद्युन्नयापतंती
दविद्योद्भरंतीमेअप्याकाम्यानि॥जनिष्टोअपोनर्यःसुजातःप्रोर्वशीति

९८

रतद्दीर्घमायुः॥॥विद्युद्दिवयापतंत्यद्योततहरंतीमेऽप्याकाम्यान्युद
कान्यंतरिक्षलोकस्ययदानूनमयंजायेताद्भ्योध्यपइतिनर्योमनुष्यो
नृभ्योहितोनरापत्यमितिवासुजातःसुजाततरोथोर्वशीप्रवर्द्धयते
दीर्घमायुःपृथिवीव्याख्यातातस्याएषाभवति॥२॥बलित्थाप
र्वतानांखिद्रंबिभर्षिपृथिवि।प्रयाभूमिंप्रवत्वतिमह्नाजिनोषि

९८

द नं १

महिनि।सत्यंत्वंपर्वतानांमेघानांखेंछेदनंबलममुत्रधारयसिपृथि
विप्रजिन्वसियाभूमिंप्रवणवतिमहत्त्वेनमहतीत्युदकवतीतिंद्रा
णीइंद्रस्यपत्नीतस्याएषाभवति॥३॥इंद्राणीमासुनारिषुसुभगामह
मश्रवं।नह्यस्याअपरंचनजरसामरतेपतिर्विश्वस्मादिंद्रउत्तरः
॥इंद्राणीमासुनारिषुसुभगामहमश्रवं।नह्यस्याअपरामपिस।

९९

मांजरयांम्रियतेपतिःसर्वस्माद्यइंद्रउत्तरःस्तमेतद्ब्रूमस्तस्याए
षापराभवति॥४॥नाहमिंद्राणिरारणसखुर्वृषाकपेर्ऋते।यस्ये
दमप्यंहविःप्रियंदेवेषुगछतिविश्वस्मादिंद्रउत्तरः।नाहमिंद्राणि
रमेसख्युर्वृषाकपेर्ऋतेयस्येदमप्यंहविरप्सुश्रितमद्भिःसंस्कृतमि
तिवाप्रियंदेवेषुनिगछतिसर्वस्माद्यइंद्रउत्तरस्तमेतद्ब्रूमोगोरी

९९

रोचतेर्ज्वलतिकर्मणोयमपीतरोगोरोवर्णएतस्मादेवप्रशस्योभ
वतितस्याएषाभवति॥५॥गौरीर्मिमायसलिलानितक्षत्येकपदीद्वि
पदीसाचतुष्पदीसा।अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमे
व्योमन्।गौरीर्निर्मिमायसलिलानितक्षतीकुर्वंत्येकपदीमध्यमेनद्वि
पदीमध्यमेनचादित्येनचचतुष्पदीदिग्भिरष्टापदीदिग्भिश्चावां

तरदिग्भिश्चनवपदीदिग्भिश्चावांतरदिग्भिश्चादित्येनचसहस्रा
क्षराबहूदकापरमेव्यवनेतस्याएषापराभवति॥६॥तस्याःसमुद्रा
अधिविक्षरंतितेनजीवंतिप्रदिशश्चतस्रः।ततःक्षरत्यक्षरंतद्विश्व
मुपजीवति।तस्याःसमुद्राअधिविक्षरंतिवर्षंतिमेघास्तेनजीवंति।
द्दिगाश्रयाणिभूतानिततःक्षरत्यक्षरमुदकंतत्सर्वाणिभूतान्युपजी

वंतिगौर्याख्यातातस्याएषाभवति॥७॥गौरमीमेदनुवत्संमिषंतंमू
र्द्धानंहिङ्ङ्कृणोन्मातवाउ।सृक्काणंघर्ममभिवावशानामिमातिमा
युंपयतेपयोभिः।गौरन्वमीमेद्वत्संनिमिषंतमनिमिषंतमादित्यमिति
वामूर्द्धानमस्याभिहिङ्ङ्करोन्मननायसृक्काणंसरणंघर्मंहरणमभि
वावशानामिमातिमायुंप्रप्यायतेपयोभिर्मायुमिवादित्यमितिवावागे

षामाध्यमिकाघर्मधुगितियाज्ञिकाधेनुर्धयतेर्वाधिनोतेर्वातस्याएषाभव
ति॥८॥उपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां।श्रेष्ठंसवं
सवितासाविषंनोभीद्धोघर्मस्तदुषुप्रवोचं।उपह्वयेसुदुघांधेनुमेतांक
ल्याणहस्तोगोधुगपिचदोग्धेनांश्रेष्ठंसवंसवितासुनोतुनइत्येषहिश्रे
ष्ठःसर्वेषांसवानांयदुदकंयद्वापयोयजुरभीद्धोघर्मस्तंसुप्रब्रवी

मिवागेषामाध्यमिकाघर्मधुगितियाज्ञिकाअघ्न्याहंतव्याभवत्यघघ्नीति
वातस्याएषाभवति॥९॥सूयवसाद्भगवतीहिभूयाअथोवयंभगवंतः
स्याम।अद्धितृणमघ्न्येविश्वदानींपिबशुद्धमुदकमाचरंती।सूयवसा
दिनीभगवतीहिभवाथेदानींवयंभगवंतःस्यामाद्धितृणमघ्न्येसर्वदा
पिबचशुद्धमुदकमाचरंतीतस्याएषापराभवति॥१०॥हिंकृण्वती

वसुपत्नीवसूनांवत्समिच्छंतीमनसाभ्यागात्।दुहामश्विभ्यांपयोअ।
घ्न्येयंसावर्द्धतांमहतेसौभगाय।इतिसानिगदव्याख्याता।पथ्यास्व।
स्तिःपंथाअंतरिक्षंतंनिवासात्तस्याएषाभवति॥११॥स्वस्तिरिद्धिप्र
पथेश्रेष्ठारेक्णस्वत्यभियावाममेति।सानोअमासोअरणेनिपातुस्वा
वेशाभवतुदेवगोपा।स्वस्तिरेवहिप्रपथेश्रेष्ठारेक्णस्वतीधनवत्यभि

न
तियावसूनिवनीयानिसानोमागृहेसानिरमणेसानिर्गमनेपातुस्वावे
शाभवतुदेवीगोप्त्रीदेवान्गोपायत्वितिदेवाएनांगोपायंत्वितिवोषाव्या
ख्याता।तस्याएषाभवति॥१२॥अपोषाअनसःसरत्संपिष्टादहबिभ्यु
षी।नियत्सींशिश्नथद्वृषा।अपासरदुषाअनसःसंपिष्टान्मेघाद्बि। द्बि
भ्युष्यनोवायुरनितेरपिवोपमार्थेस्यादनसइवशकटादिवानःशक

॥१०३॥ द्मानद्ममस्मिंश्चीवरमत्स्यैर्निर्वास्याऽज्जीवनकर्मणउपजीवंस्येनंमेघोप्य
न एतस्मादेवयन्निरशिश्नथदृषाबर्षितामध्यमस्तस्याएषापराभवति
॥१३॥ एतदस्याश्चनःशयेसुसंपिष्टंविपाश्पा। समारसीपरावतः॥एत
दस्याश्चनस्याशेतेसुसंपिष्टमितरद्विवविपाशिविमुक्तपाशिस्वसारो
षाःपरावतःप्रेरितवतःपरागताद्वेलाख्याताता तस्याएषाभवति॥१४॥ ॥१०३

अभिनइळायूथस्यमातास्मन्नदीभिरुर्वशीवागृणातु॥उर्वशीवाबृहद्दि
वागृणानाऽभ्यूर्ण्वानाप्रभृथस्यायोः॥सिषक्तुनऊर्ज्जव्यस्यपुष्टेः॥अभि
गृणातुनइळायूथस्यमातास्मदभिनदीभिरुर्वशीवागृणातूर्वशीवाबृ
हद्दिवामहद्दिवागृणानाऽभ्यूर्ण्वानाप्रभृथस्यप्रभृथस्यायोरयनस्य।
ज्योतिषोवोदकस्यवासेवनान्नोन्नस्यपुष्टेरोदसीरुद्रस्यपत्नीतस्या

रु१

॥१०४॥ एषाभवति ॥१५॥ रथंनुमा[illegible]तंवयंश्रवस्युमाहुवामहे । आयस्मिंतस्थौ
सुरणानिबिभ्रतीसचामरुत्सुरोदसी । रथंक्षिप्रंमारुतंवयंश्रवणीय
माह्वयामआयस्मिंतस्थौसुरमणीयान्युदकानिबिभ्रतीसचामरु न्मु २
द्भिःसहरोदसीरोदसी ॥१६॥ इतिएकादशोऽध्यायःसमाप्तः ॥ ॥
अथातोद्युस्थानादेवतास्तासामश्विनौप्रथमागामिनौभवतोऽश्विनौ ॥१०४॥

यद्व्यश्नुवातेसर्वंरसेनान्योज्योतिषान्योऽश्वैरश्विनावित्यौर्णवाभस्त
त्कावश्विनौद्यावापृथिव्यावित्येकेऽहोरात्रावित्येकेसूर्याचंद्रमसा
वित्येकेराजानौपुण्यकृतावित्यैतिहासिकास्तयोःकालऊर्ध्वमर्ध
रात्रात्प्रकाशीभावस्यानुविष्टंभमनुतमोभागोहिमध्यमोज्योतिर्भा
गआदित्यस्तयोरेषाभवति ॥१॥ वसातिषुस्मचरथोऽसितौपेत्वावि

सु स्म

व।क्वेदमश्विनायुवमभिदेवांऽअगच्छतं।इतिसानिगदव्याख्याता
तयोःसमानकालयोःसमानकर्म्मणोःसंस्तुतप्रायययोरसंस्तवेनैषो
र्द्धर्चोभवतिवासात्योऽअन्यउच्यतउषःपुत्रस्त्वान्यइतितयोरेषा
पराभवति।।२।।इहेहजातासमवावशीतामरेपसातन्वा३नामभिः
स्वैः।जिष्णुर्वामन्यःसुमखस्यसूरिर्दिवोऽअन्यःसुभगःपुत्रऊहे।इ

हचेहचजातौसंस्तूयेतेपापेनालिप्यमानयातन्वानामभिश्चस्वैर्जिष्णुर्वा
मन्यःसुमहतोमहतोबलस्यैरयितामध्यमोदिवोऽअन्यःसुभगःपुत्र
ऊह्यतऽआदित्यस्तयोरेषापराभवति।।३।।प्रातर्युजाविबोधयाश्विना
वेहगच्छतां।अस्यसोमस्यपीतये।प्रातर्यामिनौविबोधयाश्विनावि
हागच्छतामस्यसोमस्यपानायतयोरेषापराभवति।।४।।प्रातर्यजध्व

मश्विनाहिनोतनसायमस्तिदेवयाअजुष्टं।उतान्योअस्मद्यजतेविचावः
पूर्वःपूर्वोयजमानोवनीयान्॥प्रातर्यजध्वमश्विनोप्रहिणुतनसायमस्ति
न्योऽ देवेज्याअजुष्टमेतदप्पनोऽस्मद्यजतेविचावःपूर्वःपूर्वोयजमानोवनी
यान्वनयितृतमस्तयोःकालःसूर्योदयपर्यन्तस्तस्मिन्नन्पादेवताजुष्टं
तउषावष्टेःकान्तिकर्मणउच्छतेरितरामाध्यमिका।तस्याएषाभवति॥५॥

उषस्तच्चित्रमाभरास्मभ्यंवाजिनीवति।येनतोकंचतनयंचधामहे।उष
स्तच्चाप्पनीयन्धनमाहरास्मभ्यमन्नवतीयेनपुत्रांश्चपौत्रांश्चदधीमहि
तस्याएषापराभवति॥६॥एताउत्याउषसःकेतुमक्रतपूर्वेअर्धेरज
सोभानुमंजते।निष्कृण्वानाआयुधानीवधृष्णवःप्रतिगावोरुषीर्यन्ति
मातरः।एतास्ताउषसःकेतुमकृषतप्रज्ञानमेकस्याएवपूजनार्थेब

१०७

ऋवचनंस्यात्सूर्वेश्चर्द्वेश्चंतरिक्षलोकस्यसमंजतेभानुना॥निष्कृतएवानाम्ना
युधा।निवधूम्नवः।निरित्येषसमित्येतस्यस्थाने।एमीदेषांनिष्कृतंजारि
णीवेत्यपिनिगमोभवति।प्रतियंतिगावोगमनादरुषीरारोचनान्मातरो
भासोनिर्मात्र्यः।सूर्यासूर्यस्यपत्न्येषैवाभिसृष्टकालतमातस्याएषाभ
वति॥७॥सुकिंशुकंशल्मलिंविश्वरूपंहिरण्यवर्णंसुवृतंसुचक्रं॥आ १०७

रोहसूर्येअमृतस्यलोकंस्योनंपत्येवहतुंकृणुष्व।सुकाशनंशाल्मलंस
र्वरूपमपिवोपमार्थेस्यात्सुकिंशुकमिवशाल्मलिमिति।किंशुकंक्रंशतेःप्र
काशयतिकर्मणःशल्मलिःसुशरोभवतिशरवान्वा।आरोहसूर्येअमृतस्यलोक रथा २
मुदकस्यसुखंपत्येवहतुंकुरुष्वसवितासूर्यांप्रायच्छत्सोमायराज्ञेप्रजाप
तयेवेतिचब्राह्मणंवृषाकपायीवृषाकपेःपत्न्येषैवाभिसृष्टकालतमात

१०८ स्याएषाभवति॥८॥वृषाकपायिरेवतिसुपुत्रआदुसुस्नुषे।घसत्तइंद्रउक्ष
णःप्रियंकाचित्करंहविर्विश्वस्मादिंद्रउत्तरः।वृषाकपायिरेवतिसुपुत्रेम
ध्यमेनसुस्नुषेमाध्यमिकयावाचास्नुषासाधुसादिनीतिवासाधुसानिनी
तिवास्वपत्यंतत्सनोतीतिवाप्राश्नातुतइंद्रउक्ष्णएतान्माध्यमिकांत्संस्त्या
यानुक्षणउक्षतेर्वृद्धिकर्मणउक्षंत्युदकेनेतिवाप्रियंकुरुष्वसुखाचयक १०८

रंहविःसर्वस्माद्यइंद्रउत्तरस्तमेतद्ब्रूमआदित्यंसरण्यूःसरणात्तस्याएषा
भवति॥९॥अपागूहन्नमृतांमर्त्येभ्यःकृत्वीसवर्णामददुर्विवस्वते।उता
श्विनावभरद्यत्तदासीदजहादुद्वामिथुनासरण्यूः।अपागूहन्नमृतांमर्त्ये
भ्यःकृत्वीसवर्णामददुर्विवस्वतेप्याश्विनावभरद्यत्तदासीदजहाद्द्वौमिथु
नौसरण्यूर्मध्यमंचमाध्यमिकांचवाच—मितिनैरुक्तायमंचयमींचेत्यै

१०९

यम मां २

जेनथा

तिहासिकास्तत्रेतिहासमाचक्षतेत्वाष्ट्रीसरण्यूर्विवस्वतआदित्याद्यमौमिथुनौंचकारसासवर्णामन्यांप्रतिनिधायाश्वंरूपंकृत्वाप्रदुद्रावसविवस्वानादित्यआश्वमेवरूपंकृत्वातामनुसृत्यसंबभूवततोश्विनौजज्ञातेसवर्णायांमनुस्तदभिवादिन्येषर्ग्भवति॥१०॥त्वष्टादुहित्रेवहतुंकृणोतीतीदंविश्वंभुवनंसमेति।यमस्यमातापर्युह्यमानामहो।

१०९

जायाविवस्वतोननाश॥त्वष्टातुदुहितुर्वहनंकरोतितीमानिचसर्वाणिभूतान्यभिसमागच्छंतियमस्यमातापर्युह्यमानामहतोजायाविवस्वतोननाशरात्रिरादित्यस्यादित्योदयेंतर्धीयते॥११॥ ॥प्रथमःपादः॥ ॥सविताव्याख्यातस्तस्यकालोयदाद्यौरपहततमस्काकीर्णरश्मिर्भवतितस्यैषाभवति॥१॥विश्वारूपाणिप्रतिमुंचतेक।

१६०

विप्रासावीद्भद्रंद्विपदेचतुष्पदे।विनाकमख्यत्सविता वरेण्योनुप्र
याणमुषसोविराजति।सर्वाणि प्रज्ञानानि प्रतिमुंचते मेधावीक
विःक्रांतदर्शनोभवतिकवतेर्वाप्रसुवतिभद्रंद्विपाद्भ्यश्चतुष्पाद्भ्य
श्चव्यख्यपंनाकंसविताव रणीयःप्रयाणमनूषसोविराजत्यधोरा
मःसावित्रइतिपशुसमाम्नायेविज्ञायतेकस्मात्सामान्यादित्यधस्ता ११०

मा २

त्तद्वेलायांतमोभवत्येतस्मात्सामान्यादधस्ताद्रामोधस्तात्कृष्णःक
स्मात्सामान्यादित्यग्निंचित्वानरामामुपेयाद्रामारमणायोपेयतेनध
र्मीयकृष्णजातीयेतस्मात्सामान्यात्कृकवाकुःसावित्रइतिपशुसमा
म्नायेविज्ञायतेकस्मात्सामान्यादितिकालानुवादंपरीत्यकृकवा
कोःपूर्वंशब्दानुकरणंवचेरुत्तरंभगोव्याख्यातस्तस्यकालःप्रागु

सर्पणात्तस्यैषाभवति॥२॥प्रातर्जितंभगमुग्रंहुवेमवयंपुत्रमदिते
र्योविधर्त्ता।आध्रश्चिद्यंमन्यमानस्तुरश्चिद्राजाचिद्यंभगंभक्षीत्या
ह।प्रातर्जितंभगमुग्रंह्वयेमवयंपुत्रमदितेर्योविधारयितासर्वस्या
ध्रश्चिद्यंमन्यमानआद्यास्तुर्दरिद्रस्तुरश्चित्तुरइतियमनामतरते
र्वात्वरतेर्वात्वरयात्तूर्णगतिर्यमोराजाचिद्यंभगंभक्षीत्याहांधोभ

गइत्याहुरनुत्सृप्तोनदृश्यतेप्राशित्रमस्याक्षिणीनिर्जघानेतिचब्राह्मणं
जनंभगोगच्छतीतिविज्ञायतेजनंगच्छत्यादित्यउदयेनसूर्यःसर्त्तेर्वासु
वतेर्वास्वीर्यतेर्वातस्यैषाभवति॥३॥उदुत्यंजातवेदसंदेवंवहंतिकेतवः
।दृशेविश्वायसूर्यम्।उद्वहंतितंजातवेदसंरश्मयःकेतवःसर्वेषांभूता
नांदर्शनायसूर्यमितितस्यैषापराभवति॥४॥चित्रंदेवानामुदगाद

नीकंचक्षुर्मित्रस्यवरुणस्याग्नेः।आप्राद्यावापृथिवीअंतरिक्षंसूर्यआ
त्माजगःतस्तस्थुषश्च।चायनीयंदेवानामुद्गमदनीकंख्यानंमित्र
स्यवरुणस्याग्नेश्चापूपुरद्द्यावापृथिव्यौचांतरिक्षंचमहत्वेनसूर्यआत
माजंगमस्यचस्थावरस्यचाथयद्रश्मिपोषंपुष्यतितत्पूषाभवतित
स्यैषाभवति।।५।।शुक्रंतेअन्यद्यजतंतेअंन्यद्विषुरूपेअहनीद्यौरि

जं२

न्य२

वासि।विश्वाहिमायाअवसिस्वधावोभद्रातेपूषंनिहरातिरस्तु।शुक्रंतेअ
न्यल्लोहितंतेअन्यद्यजतंतेअन्यद्यज्ञियंतेअन्यद्विषमरूपेतेअहनीकर्म। नी२
द्यौरिवचासिसर्वाणिप्रज्ञानान्यवस्यंनवंभाजनवतीतेपूषंनिर्दत्तिरस्तुत ह२
स्यैषापराभवति।।६।।पथस्पथःपरिपतिंवचस्याकामेनकृतोअभ्यान
ळर्कं।सनोरासच्छुरुधश्चंद्राग्राधियंधियंसीषधातिप्रपूषा।।पथस्पथो

न३

धिपतिंवचनेनकामेनकृतोऽभ्यानत्यर्कमभ्यापन्नोर्कमितिवासनोद
दानुश्चापनीयाग्राणिधनानिकर्मकर्मचनःप्रसाधयतुपूषेत्यथयद्वि॰
षितोभवतितद्विष्णुर्भवतिविशतेर्वाव्यश्नोतेर्वातस्यैषाभवति॥१८॥इ
द दंविष्णुर्विचक्रमेत्रेधानिंदधेपदं।समूल्हमस्यपांसुरे।यदिदंकिंचत
द्विचक्रमतेविष्णुस्त्रिधानिधत्तेपदंपृथिव्यामंतरिक्षोदिवीतिशाक॰

पूणिःसमारोहणेविष्णुपदेगयशिरसीत्यौर्णवाभःसमूल्हमस्यप्याय
नेंतरिक्षेपदंनदृश्यतेपिवोपमार्थेस्यात्समूल्हमस्यपांसुलइवपदन्न
दृश्यतइतिपांसवःपादैःसूयंतइतिवापंनाःशेरतइतिवापिंशनीया
भवंतीतिवा॥१९॥इतिद्वितीयःपादः॥ ॥विश्वानरोव्यातस्तस्यैषनिपा ख्या
तोभवत्यैंद्र्यामृचि॥२॥विश्वानरस्यवस्पतिमनानतस्यशवसःएवैश्च

११५५

११४ चर्षणीनामूतीहुवेरथानां। विश्वानरस्यादित्यस्यानानतस्यशवसोमह
फ३ तोबलस्यैवैश्चकामैरयनैरवनैर्वाचर्षणीनांमनुष्याणामूत्याचपथार
थानामिंद्रमस्मिन्यज्ञेह्वयामिवरुणोव्याख्यातस्तस्यैषाभवति॥२॥ये
नापावकचक्षसाभुरण्यंतंजनाँअनु। त्वंवरुणपश्यसि। भुरण्युरितिक्षि
प्रनामभुरण्युःशकुनिर्भूरिमध्वानंनयतिस्वर्गस्यलोकस्यापिवोढा ११४

२२

तत्संपातीभुरण्युरनेनपावकख्यानेन। भुरण्यंतंजनाँअनु। त्वंवरुणपश्य
सि। तत्तेवयंस्तुमइतिवाक्यशेषोपिवोत्तरस्यां॥३॥येनापावकचक्षसाभु
रण्यंतंजनाँअनु। त्वंवरुणपश्यसि। विद्यामेषिरजस्पृथ्वहामिमानो
अक्तुभिःपश्यंजन्मानिसूर्य। व्येषिद्यांरजश्चपृथुमहांतंलोकमहानि
चमिमानोऽक्तुभीरात्रिभिःसहपश्यंजन्मानिजातानिसूर्यापिवापूर्व

११५ स्यां ॥४॥ येनापावकचक्षसाभुरण्यंतंजनां अनु । त्वंवरुणपश्यसि । प्रत्यंङ्
देवानांविशः प्रत्यङ्ङुदेषिमानुषान् । प्रत्यंङ्विश्वंस्वर्दृशे । प्रत्यंङिदंसर्वमि
दमभिविपश्यसीत्यपिवैतस्यामेव ॥५॥ येनापावकचक्षसाभुरण्यंतंज
नांअनु ॥ त्वंवरुणपश्यसि । तेननोजनानभिविपश्यसिकेशीकेशारश्म
यस्तैस्तद्वान्भवतिकाशनाद्वातस्यैषाभवति ॥६॥ केश्यग्निंकेशीविषं ११५

केशीबिभर्त्तिरोदसी । केशीविश्वंस्वर्दृशेकेशीदंज्योतिरुच्यते । केश्यग्निंच
विषंचविषमित्युदकनामविष्णातेर्विपूर्वस्यवासचतेर्द्यावापृथिव्योच
धारयतिकेशीदंसर्वमिदमभिविपश्यतिकेशीदंज्योतिरुच्यतइत्यादित्य
महाथाप्येतेइतरेज्योतिषीकेशिनीउच्यतेधूमेनाग्नीरजसाचमध्यमस्त
योरेषाभवति ॥७॥ त्र्यःकेशिनऋतुथाविचक्षतेसंवत्सरेवपतएकएषां ॥

११६ विश्वमेकोऽभिचष्टेशचीभिर्ध्राजिरेकस्यददृशेनरूपं।त्रयःकेशिनऋ
तुथाविचक्षतेकालेकालेभिविपश्यतिसंवत्सरेवपतएकएषामित्यग्निः
पृथिवींदहतिसर्वमेकोभिविपश्यतिकर्मभिरादित्योगतिरेकस्यदृश्यते
नरूपंमध्यमस्याथयद्रश्मिभिरभिप्रकंपयंनेतितद्वृषाकपिर्भवतिवृ
षाकंपनस्तस्यैषाभवति॥८॥पुनरेहिवृषाकपेसुविताकल्पयावहै॥ ११६

यएषस्वप्ननंशनोस्तमेषिपथापुनर्विश्वस्मादिंद्रउत्तरः।पुनरेहिवृषाक
पेसुप्रसूतानिवःकर्माणिकल्पयावहैयएषस्वप्ननंशनःस्वप्नांनाशय
स्यादित्यउदयेनसोस्तमेषिपथापुनःसर्वस्माद्यइंद्रउत्तरस्तमेतद्ब्रूम
आदित्यंयमौव्याख्यातुस्तस्यैषाभवति॥९॥यस्मिन्वृक्षेसुपलाशेदे शो २
वैःसंपिबतेयमः।अत्रानोविश्पतिःपितापुराणाँअनुवेनति।यस्मिन्

ता २ ६२

११७ वृक्षेसुपलाशेस्थानेवृतःश्रयेवापिवोपमार्थेस्याद्वृक्षइवसुपलाशइ
तिवृक्षोव्रश्चनात्पलाशंपलाशनाद्देवैःसंगच्छतेयमोरश्मिभिरादित्य
स्तत्रनःसर्वस्यपाठावापालयितावापुराणाननुकामयेताजएकपाद्
जनएकपाद्एकेनपादेनपातीतिवैकेनपादेनपीबतीतिवैकोस्य
पादइतिवा।एकंपादंनोत्खिदतीत्यपिनिगमोभवति।तस्यैषनिपातो ११७

भवतिवैश्वदेव्यामृचि॥१०॥पावीरवीतन्यतुरेकपादजोदिवोधर्त्तासिंधु
रापःसमुद्रियः।विश्वेदेवासःशृणवन्वचांसिमेसरस्वतीसहधीभिःपु
रंध्या।पविःशल्योभवतियद्विपुनातिकायंतद्वत्पवीरमायुधंतद्वानिंद्रःप
वीरवान्।आतितस्थौपवीरवानित्यपिनिगमोभवति।तद्देवतावाक्पा
वीरवीपावीरवीचदिव्यावाक्तन्यतुस्तनित्रीवाचोन्यस्यांजश्चैकपादि ता १

मृ

११८ वोधारयिताचसिंधुश्चापश्चसुक्रियाःश्वसर्वेचदेवाःसरस्वतीचसहपुरंध्या
स्तुत्याप्रयुक्तानिधीभिःकर्मभिर्युक्तानि॥एवंतुवचनानीमानीतिपृथि
नि॰१२ वीआख्याताततस्याएषानिपातोभवत्यैंद्राग्न्यामृचि॥११॥यदिंद्राग्नीपर
मस्यांपृथिव्यांमध्यमस्यामवमस्यामुतस्थः॥अतःपरिवृषणावाहिपा
तमथासोमस्यपिबतंसुतस्य।इतिसानिगदव्याख्याता॥समुद्रोव्याख्या ११८

तस्तस्यैषनिपातोभवतिपावमान्यामृचि॥१२॥पवित्रवंतःपरिवाचमा
सतेपितैषांप्रत्नोअभिरक्षतिव्रतं।महःसमुद्रंवरुणस्तिरोदधेधीराइच्छेकु
र्द्धरुणेष्वारभं।पवित्रवंतोरश्मिवंतोमाध्यमकादेवगणाःपर्यासतेमध्यमः
पितैषांप्रत्नःपुराणोभिरक्षंतिव्रतंकर्ममहःसमुद्रंवैणस्तिरोंतर्द्धधात्यथ
धीराःशक्नुवंतिधरुणेषूदकेषुकर्मणआरंभमारब्धमजएकपाद्व्याख्या

रू२

त १

११९ तःपृथिवीव्याख्यातासमुद्रोव्याख्यातास्तेषामेषनिपातोभवत्यपरस्यांबहु
देवतायामृचि॥१३॥ उतनोहिर्बुध्न्यःशृणोत्वजएकपात्पृथिवीसमुद्रः
विश्वेदेवाऋतावृधोहुवानाःस्तुतामंत्राःकविशस्ताअवंतु।अपिचनोहि
र्बुध्न्यःशृणोत्वजश्चैकपात्पृथिवीचसमुद्रश्चसर्वेचदेवाःसत्यवृधोवायज्ञ
वृधोवाहूयमानामंत्रैस्स्तुतामंत्राःकविशस्ताअवंतुमेधाविशस्तादध्य ११९

ङ्‌ःप्रसक्तोध्यानमितिवाप्रस्यक्तमस्मिन्नख्यानमिनमितिवाथर्वाख्यातो ब्या १
मनुर्मननात्तेषामेषनिपातोभवत्यैंद्र्यामृचि॥१४॥यामथर्वामनुष्पिता
दध्यङ्‌ धियमत्नत।तस्मिन्ब्रह्माणिपूर्वथेंद्रउक्थासमग्मतार्चन्ननुस्वराज्यं
।यामथर्वाचमनुष्पितामानवानांदध्यङ्‌ धियमतनिषततस्मिन्कर्म्म
णिब्रह्माणीन्द्रउक्थानिचसंगच्छंतामर्चन्योनुपास्तेस्वाराज्यं॥१५॥ ॥

पि २ च २

१२० तृतीयःपादः॥२॥अथातोद्युस्थानादेवगणास्तेषामादित्याःप्र
थमागामिनोभवंत्यादित्योव्याख्यातास्तेषामेषाभवति॥१॥इमा
गिरआदित्येभ्योघृतस्नूःसनाद्राजभ्योजुह्वाजुहोमि।शृणोतुमि
त्रोअर्यमाभगोनस्तुविजातोवरुणोदक्षोअंशः।घृतस्नूर्घृतप्रस्ना क्षो २
विन्योघृतप्रस्राविण्योघृतसारिण्योघृतसानिन्यइतिवा।स्तुतीरा १२०

दित्येभ्यश्चिरंजुह्वाजुहोमिचिरंराजभ्यइतिवा।शृणोतुनइमागि
रोमित्रश्चार्यमाचभगश्चबहुजातश्चधातादक्षोवरुणोंऽशश्चांशु श
नाव्याख्यातःसप्तऋषयोव्याख्यातास्तेषामेषाभवति॥२॥सप्तऋ
षयःप्रतिहिताःशरीरेसप्तरक्षंतिसदमप्रमादं।सप्तापःस्वपतोलो
कमीयुस्तत्रजागृतोअस्वप्नजौसत्रसदौचदेवौ।सप्तऋषयःप्र

१२१ तिहिताःशरीरेरश्मयआदित्येसप्तरक्षंतिसदमप्रमादंसंवत्सरम-
प्रमाद्यंतःसप्तापनास्तएवस्वपतोलोकमस्तमितमादित्यंयंत्यत्र
जाग्रतोअस्वप्नजौसत्रसदौचदेवौवाय्वादित्यावित्यधिदैवतम
थाध्यात्मंसप्तऋषयःप्रतिहिताःशरीरेषडिंद्रियाणिविद्यासप्त-
म्यात्मनिसप्तरक्षंतिसदमप्रमादंशरीरमप्रमाद्यंतिसप्तापनानी १२१

जा१
मान्येवस्वपतोलोकमस्तमितमात्मानंयंत्यत्रनागतोअस्वप्नजौ
सत्रसदौचदेवौप्राज्ञश्चात्मातैजसश्चेत्यात्मगतिमाचष्टेतेषा
मेषापराभवति॥३॥तिर्यग्बिलश्चमसऊर्ध्वबुध्नोयस्मिन्यशोनि
हितंविश्वरूपं।अत्रासतऋषयःसप्तसाकंयेअस्यगोपामहतो
बभूवुः।तिर्यग्बिलश्चमसऊर्ध्वबंधनऊर्ध्वबोधनोवायस्मिन्य-

विश्व १

१२२ शोनिहितंसर्वरूपमत्रासतऋषयःसप्तसहादित्यरश्मयोयेऽस्य
गोपामहतोबभूवुरित्यधिदैवतमथाध्यात्मंतिर्य्यग्बिलश्चमस
प ऊर्ध्वबंधनऊर्ध्वबोधनोवातस्मिन्यशोनिहितंविश्वरूपमत्रास सर्व ३
तऋषयःसहेंद्रियाणियान्यस्यगोप्तॄणिमहतोबभूवुरित्यात्मग
तिमाचष्टेदेआख्यातास्तेषामेषाभवति॥४॥देवानांभद्रासुमति १२२
सप्त२वा१

ऋजूयतांदेवानांरातिरभिनोनिवर्त्ततां।देवानांसख्यमुपसेदिमा
वयंदेवानआयुःप्रतिरंतुजीवसे।देवानांवयंकल्याण्यांमतावृ
जुगामिनामृतुगामिनामितिवादेवानांदानमभिनोनिवर्त्ततांदे
वानांसख्यमुपसीदेमवयंदेवानआयुःप्रवर्द्धयंतुचिरंजीवनाय।
विश्वेदेवाःसर्वेदेवास्तेषामेषाभवति॥५॥ओमासश्चर्षणीधृतो।

१२३ विश्वेदेवासआगत।दाश्वांसोदाशुषःसुतं।अवितारोवाअवनीयावामनु
ष्यधृतःसर्वेचदेवाइहागच्छतदत्तवंतोदत्तवंतःसुतमितितदेतदेकमे
वैश्वदेवंगायत्रंतृचंदशतयीषुविद्यतेयत्तुकिंचिद्बहुदैवतंतद्वैश्व
देवानांस्थानेयुज्यतेयदेवविश्वलिंगमितिशाकपूणिरनत्यंतगतस्त्वे
षउद्देशोभवतिभूतांशःकाश्यपआश्विनमेकलिंगमभितष्टीयंसूक्त १२३

मेकलिंगंबभ्रुरेकइतिदशद्विपदाअलिंगाःसाध्यादेवाःसाधनात्तेषामे
षाभवति॥६॥यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्
।तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः।यज्ञेनयज्ञमयजं
तदेवाअग्निनाग्निमयजंतदेवाअग्निःपशुरासीत्तमालभंततेनायजंतेति सी२
चब्राह्मणं।तानिधर्माणिप्रथमान्यासन्।तेहनाकंमहिमानःसंसेव्यंतय

त्रपूर्वेसाध्याःसंतिदेवाःसाधनाद्युस्थानोदेवगणइतिनैरुक्ताःपूर्वेदेव
युगमित्याख्यानंवसवोयद्विवसतेसर्वमग्निर्वसुभिर्वासवइतिसमाख्या
तस्मात्पृथिवीस्थानाइंद्रोवसुभिर्वासवइतिसमाख्यातस्मान्मध्यस्था-
नावसवआदित्यरश्मयोविवासनात्तस्माद्युस्थानात्तेषामेषाभवति॥
७॥सुगावोदेवाःसुपथाअकर्मयआजग्मुःसवनमिदंजुषाणाः।जक्षि

वांसःपपिवांसश्चविश्वेस्मेधत्तवसवोवसूनि।स्वागमनानिवोदेवाः-
सुपथान्यकर्मयआगच्छतसवनानीमानिजुषाणाःखादितवंतःपीतवं
तश्चसर्वेस्मासुधत्तवसवोवसूनितेषामेषापराभवति॥८॥ज्मयाअ
त्रवसवोरंतदेवाउरावंतरिक्षेमर्जयंतशुभ्राः।अर्वाक्पथउरुज्रयः
कृणुध्वंश्रोतादूतस्यजग्मुषोनोअस्य।ज्मयाअत्रवसवोरमंतदेवाज्मा

पृथिवीतस्यांभवाउरौचांतरिक्षेमर्जयंतगमयंतरमयंतशुभ्राःशोभमाना
अर्वाचएनान्यथोबकुजवाःकुरुध्वंश्रुतएतद्दूतस्यजग्मुषोनोअस्याग्ने
र्वाजिनोव्याख्यातास्तेषामेषाभवति॥९॥शंनोभवंतुवाजिनोहवेषुदेव
तातामितद्रवःस्वर्काः।जंभयंतोहिंवृकंरक्षांसिसनेम्यस्मद्युयवंनमी
वाः।सुखानोभवंतुवाजिनोह्वानेषुदेवतातौयज्ञेमितद्रवःसुमितद्रवः

स्वर्काःस्वंचनाइतिवास्वर्चनाइतिवास्वर्चिषइतिवाजंभयंतोहिंचवृकं
चरक्षांसिचक्षिप्रमस्मद्यावयंनमीवादेवाश्वाइतिवादेवपत्न्योदेवानां
पत्न्यस्तासामेषाभवति॥१०॥देवानांपत्नीरुशतीरवंतुनःप्रावंतुनस्तुजये श१
वाजसातये।याःपार्थिवासोयाअपामपिव्रतेतानोदेवीःसुहवाःशर्मय
छत।देवानांपत्न्यउशत्योवंतुनःप्रावंतुनोपत्यजननायचान्नसंसनना

१२६ यचयाःपार्थिवासोयाअपामपिकर्मणिव्रतेतानोदेव्यःसुहवाःशर्मयच्छंतु।
शरणंतासोमेषापरोभवति॥११॥उतग्नाव्यंतुदेवपत्नीरिंद्राण्य१ग्नाय्य
श्विनीराट्।आरोदसीवरुणानीशृणोतुव्यंतुदेवीर्यऋतुर्जनीनाम्।अ
पिग्नाव्यंतुदेवपत्न्यइंद्राणीइंद्रस्यपत्न्यग्नाय्यग्नेःपत्न्यश्विन्यःश्विनोःप
त्नीराट्राजतेरोदसीरुद्रस्यपत्नीवरुणानीचवरुणस्यपत्नीव्यंतुदेव्यः १२६

१२७ कामयंतां~~यस्तुःकालोजायानां~~यस्तुःकालोजायानांयस्तुःकालोजा
यानाम्॥१२॥चतुर्थःपादः॥ ॥इतिद्वादशोऽध्यायः१२समाप्तः॥श्री॥
संवत्१८५१वर्षेमितिमाघशुक्लपक्षेतिथि१४चंद्रवारेणसंपूर्णंलिषितं

१२७